8. आ upto, all round, a little गम् to go आगच्छति comes
छद् to cover आच्छादयति covers all round
कम्प् to shake आकम्पते shakes a little
9.उत् - द् upon, above गम् to go उद्गच्छति goes up
10. उप towards, near to हृ to take उपहरति brings near
11. दुस् - र् bad, hard to be doneचर् to walk, to behave
दुश्चरति misbehaves
12. नि in, into, down क्षिप् to throw निक्षिपति throws in/down
13. निस्- र् out of, away from गम् to go निर्गच्छति goes out
14. परा away, back, opposed to कृ to do पराकरोति rejects
जि to win पराजयते defeats

15. परि all round, about धा to place परिदधाति places all around
16. प्र forth, before या to go प्रयाति goes forth
17. प्रति towards, in return, against गम् to go प्रतिगच्छति goes towards प्रतिकरोति acts against प्रतिभाषते speaks in return
18. वि apart, separate from क्री to buy विक्रीणाति sells
चल् to move विचलति moves apart

Note :(*Sometimes this has an intensive force, as in the word विकराल, very dreadful*)

19. सम् together with, excellent, full गम् to go संगच्छते comes or goes together,
कृ संस्करोति refines, adorns, हृ to take away, संहरति destroys
20.सु well कृ to do सुकरोति does well सुकृतम् = well done

These prepositions are used in the following three ways :
1. to totally alter the original sense, e.g. हरति = takes away, but with सम् as in संहरति = kills (see the sentence 1 above)
2. to follow the same meaning, e.g. वसति = lives, and with नि as निवसति = lives (see the sentence 2)
3. to intensify the meaning, e.g. शंसति = praises, and with प्र as प्रशंसति (see the sentence 3 above)

धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा ॥
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥

[हृ = to take away, with प्र , प्रहरति = attacks ; सं + हृ = संहरति =

kills ; वि + हृ = विहरति = roams ;आ + हृ = आहरति = brings ; परि + हृ = परिहरति = avoids.]

शब्दसंग्रहः

पुंलिङ्गशब्दाः

आदेशः order
कण्ठः neck, throat
कूपः well
प्रसादः grace
व्याधः a hunter
बाणः an arrow
धनुर्धरः an archer
भृत्यः a servant
मृगः deer
योधः soldier
लोकः world, people
वादः dispute
वृश्चिकः scorpion
हस्तः hand
आश्रमः hermitage
श्वशुरः father-in-law
तालः palm tree
अभिलाषः desire
खल्वाटः a bald man
अनुक्रोशः pity
तातः father

नपुंसकलिङ्गशब्दाः

आसनम् seat
दर्शनम् sight
दानम् gift, donation
बलम् might
पुच्छम् tail
भूषणम् ornament
रोदनम् crying
असत्यम् untruth
विषम् poison
अजीर्णम् indigestion
मुखम् face, mouth
समीपम् nearness

अव्ययानि

इति thus, so
अतः , अत एव therefore
अनुसर्तुम् to follow
यतः since, because

विशेषणानि

गर्वित arrogant
घोर terrible
तीक्ष्ण sharp
दरिद्र poor
दुष्ट wicked
धनिक rich
नीच mean
सुप्त asleep
हत killed
अल्प little
अधिक more
वन्द्य respectable
समीप nearness
सर्व all, every
मधुर sweet
नील blue
स्थित standing

धातवः **(I Class)**

आ+गम् [गच्छ्] to come
अधि+गम् [गच्छ्] to understand
भज् to worship
नि+वस् to live
स्था [तिष्ठ्] to stand
उद्+स्था [तिष्ठ्] to get up
आ+हृ (हर्) to bring
सम्+हृ (हर्) to kill
त्यज् to give up
उद्+नी (नय्) to lift (उन्नयति)
आ+ह्वे (ह्वय्) to call (आह्वयति)
कथ्यते = is called (passive verb)

धातवः **(VI Class)**

इष् [इच्छ्] to wish
क्षिप् to throw
आ+दिश् to order
प्र+विश् to enter
मुच् (मुंच्) to release
उप+विश् to sit
उप+विश् to sit
प्रच्छ् (पृच्छ्) to ask
गुह् (गूह) to hide

I. Translate the following into English:-

१) सचिवस्य पुत्राः अत्र एव आगच्छन्ति ।
२) निषादस्य बाणेन मृगः हतः भवति ।
३) व्याघ्राः सिंहाः च घोरेषु वनेषु अटन्ति ।
४) रामः दशरथस्य आदेशम् अनुसर्तुं वनं गच्छति ।
५) अलसाः बालकाः मार्गे उपविशन्ति ।

६)	आचार्यः छात्रैः सह आश्रमे निवसति ।
७)	बालः अज्ञानात् अनलं स्पृशति ।
८)	व्याधाः मृगेषु बाणान् मुंचन्ति ।
९)	मृगस्य शरीरे तीक्ष्णः शरः पतति ।
१०)	श्रीकृष्णः अर्जुनं धर्मम् उपदिशति ।
११)	अल्पस्य कृते अधिकं न त्यजन्ति पण्डिताः ।
१२)	सूर्यः मेघानाम् उपरि भवति ।
१३)	नायकस्य समीपे बहुजनाः तिष्ठन्ति ।
१४)	खल्वाटाः तालवृक्षस्य अधः न तिष्ठन्ति ।
१५)	जनाः विदेशात् धनम् आहरन्ति ।
१६)	भक्ताः कृष्णं 'हे गोविन्द , दामोदर , माधव' इति भजन्ति ।
१७)	वृक्षस्य उपरि सर्पः अस्ति ।
१८)	व्याधानां समीपे तीक्ष्णाः बाणाः भवन्ति ।
१९)	शिवः श्वसुरस्य हिमालयस्य गृहे निवसति ।
२०)	वानराः वृक्षेभ्यः फलानि पुष्पाणि च क्षिपन्ति ।
२१)	यतः शिवस्य कण्ठः नीलः अतः सः नीलकण्ठः इति कथ्यते ।

II.**Translate the following into Sanskrit:**

1)	Sons obey father's orders.
2)	The scorpion's poison is in its tail.
3)	Lava and Kusha stand near Rama.
4)	Students get up at the sight of the teacher.
5)	Thieves stand in front of the house of a rich man.
6)	Hunter shoots an arrow at the deer.
7)	Children's might is in crying.
8)	The brave have no fear.

9) Deer do not enter the mouth of a lion (which is) asleep.
10) A thief hides (his) money behind a mountain.
11) God kills the wicked persons.
12) Clouds move above the mountains and release the water.
13) Students bring the sweet fruits for the teacher.
14) Untruth is the wealth of thieves.
15) The wicked have no pity.
16) Everyone has a desire for money.
17) Father-in-law is not equal to father.
18) Silence is an ornament of the fools.
19) Food becomes poison due to indigestion.
20) The mean always wish quarrels and the arrogant dispute.
21) Man lives happily (with happiness) on account of God's grace.
22) There are always good and bad people in the world.
23) Teacher calls the students who are standing outside.
24) Sarvepalli Radhakrishna is respectable, since he was a teacher.
27) I read Samskrit, therefore I understand Ramayana.28) Bhima lifts Anjaneya's tail with his (two) hands.
29) Ministers get up at the sight of the Prime Minister.

*****

अष्टमः पाठः (Lesson – 8)

क्रियापदानि (4^{th} and 10^{th} Class)

विभक्तयः – विशेषनियमाः

१. मयूरः मेघस्य दर्शने *नृत्यति* । Peacock dances at the sight of a cloud.

२. चोराः रत्नानि *चोरयन्ति* । Thieves steal the jewels.

३. नृपः चोरान् *दन्डयति* । King punishes the thieves.

नियमाः

1. The conjugational sign of the 4^{th} Class is **'य'**

   नृत् + य + ति = नृत्यति ।

2. The conjugatioal sign of the 10th Class is **'अय'**

   चुर् (चोर्) + अय + ति = चोरयति ।

   दन्ड् + अय + ति = दन्डयति ।

विशेषनियमाः । (Special rules of the Cases)

I. **द्वितीया** (Objective Case)

1. छात्राः विद्यालयं गच्छन्ति ।
2. श्रीरामदूतः रामं विना अन्यं न भजति ।

II. **तृतीया** (Instrumental Case)

1. पुष्पैः विना उद्यानं न विलसति ।
2. गोपालेन सह रमेशः अपि मन्दिरं गच्छति ।
3. कृष्णेन सार्धं / साकं / समं / सह अर्जुनः कुरुक्षेत्रं गच्छति ।

4.किं नो राज्येन गोविन्द ! किं भोगैःजीवितेन वा ?
(Bha.Gi.I.32)

5.देवानां दानैः न प्रयोजनम् ।

6.कोऽर्थः पुत्रेण जातेन यो न शिक्षितः ।

7.भार्गवः रामेण समः न भवति ।

8.मात्रा समं नास्ति शरीरपोषणम् ।
(मात्रा is III case of 'मातृ' शब्द)

9.अलं श्रमेण ।

III. चतुर्थी (Dative Case)

1. उपाध्यायः छात्राय पुस्तकं यच्छति ।
2. सैनिकः युद्धाय गच्छति ।
3. आचार्याय नमः ।
4. शिष्येभ्यः स्वस्ति ।
5. फलानि एव भोजनाय अलम् ।
6. तातः अलसाय पुत्राय कुप्यति ।
7. मधुकराः पुष्पेभ्यः (पुष्पाणि) स्पृहयन्ति |
8. दुर्जनः सज्जनाय द्रुह्यति ।

IV. पंचमी (Ablative Case)

1. मौनात् मूर्खः
(one is considered as) a fool due to (his) silence.
2. क्रोधात् भवति संमोहः
(delusion follows on account of wrath. भगवद्गीता (II.62)
3. रोगात् भीतः । (he) is afraid of disease)
4. सर्पात् भीतोऽस्मि । (I am afraid of a snake.)

5. योगः रोगात् रक्षति ।
(practising Yoga protects (us) from disease.

V. षष्ठी (Genitive / Possessive Case)

1. लवः रामस्य पुत्रः ।
2. वेदानां सामवेदोऽस्मि । (भगवद्गीता.X.22)
3. भारतस्य समीपे अण्वस्त्रम् अस्ति ।

VI. सप्तमी (Locative Case)

1. बालयोः गोपालः कुशलतरः ।
2. धनुर्धरेषु (धनुर्धराणां)अर्जुनः अग्रेसरः ।
3. जनकः पुत्रे स्निह्यति ।

VII. REPETITION OF WORDS :

1. ग्रामात् ग्रामात् जनाः नगरं गच्छन्ति ।
2. मुण्डे मुण्डे मतिर्भिना ।

---

a) The place of destination is put in the Objective Case / द्वीतीया. See.ex.I (1)

b) The अव्यय 'विना' governs द्वितीया, तृतीता । See. I. (2), II.(1)

c) सह, साकं, समं, सार्धं, the adjective सम and the indeclinable अलम् (in preventive sense) govern the तृतीया । See examples II (2 to 9). Words like किं, प्रयोजन, अर्थः etc. expressing *use* or *need* also govern the तृतीया of that which is used or needed.

d) The person to whom something given is called संप्रदान। A noun denoting संप्रदान is placed in the चतुर्थी। The person or the thing with reference to which an action is done is also संप्रदान। See III (1, 2). The words नमः, स्वस्ति, and अलम् (in the sense of sufficiency) govern the चतुर्थी। See III (3, 4, and 5).

e) The root स्पृह् (to be fond of) governs the चतुर्थी or द्वितीया of the object of liking. See III (7).

f) Verbs implying '*anger*' and '*hatred*' govern the चतुर्थी of the target of anger and hatred. See III (6, 8)

g) The पंचमी is used to denote the cause or the motive in the sense of 'on account of ', 'because of '. See IV (1, 2). It is also used to express 'fear' or 'protection from fear' or that from which /whom fear proceeds. See IV (3, 4,5)

h) Genitive Case is used to denote '*relation*' and '*possession*'. See.V.1& 3. Genetive plural number is used to denote the meaning '*among*'. See V (2)

i) For a comparison between two, a word is used in सप्तमी द्विवचनम्। For establishing the quality among many, a word is used in सप्तमी / षष्ठी बहुवचनम्। See VI (1, 2)

j) The root स्निह् governs the सप्तमी of the object of love. See VI (3)

k) For expressing the sense of '*each*' and '*every*', a word is repeated twice in the suitable case. See VII (1, 2)

शब्दसंग्रहः

पुंलिङ्गशब्दाः **नपुंसकलिङ्गशब्दाः**

गुणः quality
चन्द्रः the moon
यज्ञः sacrifice
ग्रीष्मः summer
प्रदोषः dusk
नर्तकः dancer
मधुकरः honey bee
सरोवरः lake
मर्कटः monkey
मार्जारः cat
प्रलापः prattling
मयूरः peacock
वित्तकोषः a bank
आलयः temple
मूषकः rat
शुकः parrot
ह्रदः lake
शैलः mountain
सन्मार्गः right path

उद्यानं garden
काव्यं poem
चन्दनं sandalwood
नक्षत्रं star
माणिक्यं ruby
रत्नं jewel
शरणं refuge
शरीरं body
समरं battle
जीवनं life
आकाशं sky
अपत्यं child

अव्ययानि

प्रतिदिनं every day
अतीव much, very much
अलम् enough
कथम् how ?
विना without, except

विशेषणानि

अग्रेसर foremost
रम्य pleasing
शकल piece
स्वस्ति benediction
सकृत् once
तर्हि then

कुशल clever / expert
दुःखित miserable
सार्धम् along with
स्वाहा oblation
सुखम् happily

धातवः (IV Class)

कुप् to be angry (कुप्यति)
क्रुध् to get wild (क्रुध्यति)
द्रुह् to hate (द्रुह्यति)
नश् to perish (नश्यति)
नृत् to dance (नृत्यति)
शुष् to get dry (शुष्यति)
स्निह् to love (स्निह्यति)
तुष् to feel happy (तुष्यति)

धातवः (X Class)

कथ् to tell (कथयति)
गण् to count (गणयति)
चुर् to steal (चोरयति)
तड् (ताड्) to beat (ताडयति)
दण्ड् to punish (दण्डयति)
धृ (धार्) to wear, to bear (धारयति)
पीड् to trouble (पीडयति)
वर्ण् to describe (वर्णयति)
स्पृह् to long for, to be fond of (स्पृहयति)
क्षल् to wash (off) (क्षालयति)
सान्त्व् to pacify (सान्त्वयति)
पूज् to worship (पूजयति)

धातवः (I Class)

वि + लस् to shine

दृश् (causal दर्शय) to show

अभ्यासाः

I. Translate the following into English:

१) बालः चन्द्रं पश्यति तुष्यति च ।

२) जनकः पुत्राय कुप्यति ।

३) आचार्यः शिष्याय कथां कथयति । *[the root कथ् (to tell) governs the Dative of the person to whom something is told]*

४) भृत्याः नृपस्य गुणान् वर्णयन्ति ।

५) किं त्वं नक्षत्राणि गणयसि ?

६) भटः चोरान् ताडयति।

७) धनं विना जीवनं दुःखकरं भवति।

८) खगाः ह्रदस्य जलं पिबन्ति।

९) मर्कटाः कूपस्य समीपे नृत्यन्ति।

१०) सर्वे कुसुमेषु स्निह्यन्ति।

११) नर्तकाः शरीरे भूषणानि धारयन्ति।

१२) दुष्टाः सदा सज्जनान् पीडयन्ति।

१३) तुषारेण पुष्पाणि नश्यन्ति।

१४) यूयं धनं विना कथं जीवथ ?

१५) वने वने चन्दनं न भवति।

१६) रामस्य बाणः राक्षसानां संहाराय अलम्।

१७) चोरः वित्तकोषात् धनं चोरयति।

१८) मुकुन्दः हस्तौ पादौ च क्षालयति।

II. Translate the following into Sanskrit:

1) A virtuous person lives happily.
2) Teachers love clever students.
3) Diseases perish by looking at the rising (उदयमानस्य) Sun.
4) King gets angry with the lazy ministers and punishes (them).
5) Parrots are fond of the best fruits.
6) Boys play and feel happy.
7) Life, in cities, becomes miserable without water.
8) Everyday students say, 'Salutation to the teacher'.
9) Among poems, drama is pleasing.
10) Diseases trouble the body.
11) In summer lakes get dry.

12) Many people worship Rama and Krishna.
13) The moon, king among the stars, shines in the sky.
14) Beggars live around a temple.
15) As a garden shines with flowers, so does a home with children.
16) Teacher shows the right path to the students.
17) If there is no Yagna, then there will be no rain.

III. Recognize the classes and conjugate fully:

1. स्पृह् 2. इष् [इच्छ्] 3. कुप् 4. लस् 5. वस् 6. क्षिप् 7. पीड् 8. स्निह्

IV. Make sentences using the above roots and the following अव्ययाs. साकम् । कथम् । विना । अलम् ।

*****

नवमः पाठः (Lesson – 9)

वर्तमानकालः – कर्तरिप्रयोगः – (Active Voice)

Roots अस् and कृ

1. The root अस् belongs to the 2nd Conjugation and कृ to the 8th. Unlike the roots
   taught so far, the derivation of these two roots is irregular. Therefore, their derived forms in the present tense are given below:

अस् (to be)				कृ (to do)		
III. अस्ति	स्तः	सन्ति	III.	करोति	कुरुतः	कुर्वन्ति
II. असि	स्थः	स्थ	II.	करोषि	कुरुथः	कुरुथ
I. अस्मि	स्वः	स्मः	I.	करोमि	कुर्वः	कुर्मः

2. सन्धयः

The word सन्धि is made of a preposition सम् (together) and a root धा (to join).
It means, therefore, the joining of two letters coming in close contact with eath other.

3. **सन्धि** is necessary in the following three situations :-
   a) In the process of forming a word –
      बाल + इन = बालेन
   b) Between a proposition and a root --
      उप + एति = उपैति
   c) In compounding separate words --
      मुर + अरिः = मुरारिः

While in the case of a sentence, it depends on the will of the writer, e.g.
रामस्य + अनुजः = रामस्यानुजः or रामस्य अनुजः । मम + एव = ममैव or मम एव ।
But when सन्धि is made, it follows the relevant rules thereof. Some of the rules of the Vowel-Sandhis are given below:-

4. **<u>सवर्ण – दीर्घ – सन्धिः</u>** :- When a simple vowel (short or long) is followed by a similar (short or long), the substitute for both will be a similar long vowel.

१) मुर + अरिः = मुरारिः (अ + अ = आ)
२) विद्या + आलयः = विद्यालयः (आ + आ = आ)
३) अत्र + आगच्छ = अत्रागच्छ (अ + आ = आ)
४) रमा + अवदत् = रमावदत् (आ + अ = आ)
५) कवि + इन्द्रः = कवीन्द्रः (इ + इ = ई)
६) श्री + ईशः = श्रीशः (ई + ई = ई)
७) देवकी + इच्छति = देवकीच्छति (ई + इ = ई)
८) भानु + उदयः = भानूदयः (उ + उ = ऊ)
९) साधु + ऊहः = साधूहः (उ + ऊ = ऊ)
१०) पितृ + ऋणम् = पितॄणम् (ऋ + ऋ = ॠ)

5. <u>गुणसन्धिः</u> :- When अ or आ is followed by इ, उ, ऋ (short or long), the corresponding Guna letter of the latter substitutes both the vowels.

१) देव + इन्द्रः = देवेन्द्रः (अ + इ = ए)
२) विश्व + ईश्वरः = विश्वेश्वरः (अ + ई = ए)
३) तथा + इति = तथेति (आ + इ = ए)

४) गीता + उपदेशः = गीतोपदेशः (आ + उ = ओ)
५) गङ्गा + उदकम् = गङ्गोदकम् (आ + उ = ओ)
६) देव + ऋषिः = देवर्षिः (अ + ऋ = अर्)
७) वसन्त + ऋतुः (अ + ऋ = अर्)

6. <u>वृद्धिसन्धिः</u>- When अ or आ is followed by ए or ऐ, they are substituted by ऐ and when followed by ओ or औ , they are substituted by औ.

१. मम + एव = ममैव (अ + ए = ऐ)
२. नृपस्य + ऐश्वर्यम् (अ + ऐ= ऐ)
३. न + ऐच्छत् = (अ + ऐ = ऐ)
४. गंगा + ओघः (आ + ओ = औ)
५. वनस्य + औषधिः (अ + औ = औ)

7. <u>पूर्वरूपसन्धिः</u> :- When ए or ओ at the end of a word is followed by 'अ' , the latter merges into the former and the mark called अवग्रः 'ऽ' is generally put in its place.

१) हरे + अव = हरेऽव
२) विष्णो + अव = विष्णोऽव

8. विसर्गसन्धिः –

Rule	preceded by	विसर्गः	followed by	becomes	Example
A	अ	:	अ or a soft consoanat	उ > ओ	शिवः+अर्च्य = शिवोऽर्च्यः। देवः+वन्द्यः= देवो वन्द्यः
B	अ, आ इ, उ सः एषः	: : :	a vowel or a soft consonant any vowel except अ a vowel except अ / consonant	dropped " "	नराः + इमे = नरा इमे नराः+ गच्छन्ति = नरा गच्छन्ति। बुधः+ इच्छति = बुध इच्छति ; कविः+रमते= कवि रमते (कवी रमते) भानुः+ राजते = भानु राजते (भानू राजते) सः + आगच्छति = स आगच्छति सः + तत्र = स तत्र एषः + इच्छति = एष इच्छति एषः + गच्छति = एष गच्छति
C	any vowel except अ or आ	:	a vowel or a soft consonant	र्	कविः+आयाति= कविरायाति कविः+गच्छति = कविर्गच्छति।
D	any vowel	:	च् or छ्	श्	हरिः+चरति = हरिश्चरति।
E	any vowel	:	त् or थ् ट् o rठ्	स् ष्	नमः+ते = नमस्ते। रामः+टीकते = रामष्टीकते।

F	any vowel	:	क् ख् प् फ् श् ष् स्	remains unchanged	गिरेः+ शिखरम् = गिरेः शिखरम्। मुनेः+समक्षम्= मुनेः समक्षम्। पत्रैः+फलानि= पत्रैः फलानि। बालः+करोति= बालःकरोति (बाल करोति), तरुणः+खनति=तरुणःखनति (तरुण खनति) बालः+पिबति = बालः पिबति (बाल पिबति) गुरुः+षष्ठः= गुरुः षष्ठ (गुरुष्षष्ठः) शिशुः+सरति= शिशुःसरति (शिशुस्सरति)

शब्दसंग्रहः

(पु)
असुरः demon
अहितः enemy
काकः crow
क्रोधः rage
गजः elephant
परापकारः harm to others
राजहंसः white swan
मर्षः patience
लोभः greed
सागरः ocean
भेदः difference
पिकः cuckoo

(नपुं)
अनृतं a lie
मौक्तिकं pearl
गात्रं body
ज्ञानं knowledge
तत्त्वं truth
दुःखं grief
दारिद्र्यं poverty
पङ्कजं lotus
प्रयोजनं use
स्वप्नः dream
शास्त्रं science
श्रोत्रं ear

विशेषणानि

अव्यय imperishable
निर्मल pure
पतित fallen
पर great
प्रिय dear, fond of
कृश lean
असहाय helpless
अपरिच्छद without attendants
कृष्ण black
कः ? Who? (Mas)
प्राप्त arrived
चल fickle

अव्ययानि

नित्यम् always
प्रति towards
यत्र – तत्र where – there
यथा – तथा as – so
यदा – तदा when – then
यदि – तर्हि if – then
यद्यपि – तथापि though – still
हि indeed
वरम् better

धातवः

अस् II – to be कृ VIII – to do -- जायते = is born (जन् – IV)
स्वपिति = sleeps (स्वप् – II)
नन्द् I – to feel pleased

पठनाभ्यासः

Split the Sandhis, recognize each word, try to put the words into prose order and translate the poems:

1) अलंकारप्रियो विष्णुः जलधाराप्रियः शिवः ।
नमस्कारप्रियो भानुर्ब्राह्मणो मधुरप्रियः ॥

2) एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ।
स्वप्नेष्वेवंविधा चिन्ता मृगेन्द्रस्य न जायते ॥

3) काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥

4) चला लक्ष्मीश्चलाः प्राणाश्चले जीवितमन्दिरे ।
चलाचले च संसारे धर्म एको हि निश्चलः ॥

5) दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः ।
सर्पो हि दशति कालेन दुर्जनस्तु पदे पदे ॥

6) एकेनैव सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैव दशभिः पुत्रैः भारं वहति गर्दभी ॥

7) कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥

8) आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

9) धर्मो जयति नाधर्मः सत्यं जयति नानृतम् ।
मर्षो जयति न क्रोधो देवो जयति नासुरः ॥

10) हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥

11) नास्ति लोभसमं रोगो नास्ति क्रोधसमोऽहितः ।
नास्ति दारिद्र्यसमं दुःखं नास्ति ज्ञानात् परं सुखम् ॥

12) शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
सज्जना न हि सर्वत्र चन्दनं न वने वने ॥

13) यथा परोपकारेण सदा तुष्यति सज्जनः ।
तथा परापकारेण नित्यं नन्दति दुर्जनः ॥

14) यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ॥

15) यत्र योगेश्वरकृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

दशमः पाठः (Lesson – 10)

आकारान्तः स्त्रीलिङ्गः ’कन्या’ शब्दः

	ए.व.	द्वि.व.	ब.व.
प्र.	कन्या	कन्ये	कन्याः
सं.प्र.	कन्ये	“	“
द्वि.	कन्याम्	“	“
तृ.	कन्यया	कन्याभ्याम्	कन्याभिः
च.	कन्यये	“	कन्याभ्यः
प.	कन्यायाः	“	“
ष.	“	कन्ययोः	कन्यानाम्
स.	कन्यायाम्	“	कन्यासु

1. When the **अव्यय ’स्म’** is placed at the end of a verb in the present tense, the meaning of the verb is changed to indicate past tense.
2. Sometimes noun of a definite gender is used to qualify another noun of different gender. In such cases, the qualifying noun does not change its gender to suit the qualified, e.g. अर्जुनस्य *मित्रं* कृष्णः युद्धं न करोति स्म ।

शब्दसंग्रहः

(पुं)	**(नपुं)**
दीपः a lamp	कुसुमं a flower
अन्तः end	श्रवणं hearing
कुमारः a boy	काष्ठं wood
पवनः air	तीरं bank

संगमः meeting of rivers
बुधः a wise man
रमणः lover, husband
कान्तः husband
शब्दः sound
वीरः a hero, warrior
औषधं medicine
मस्तकं head
शिक्षणं learning
आनन्दः happiness
उत्सवः festival

(स्त्री)

आज्ञा order
चिता pyre
कथा story
कला fine art
कन्या a girl
कान्ता wife
क्षमा patience
कृपा kindness
निशा night
सभा assembly
प्रार्थना prayer
देवता a godhead / deity
भार्या wife
प्रभा brilliance
भाषा language
चिन्ता worry
निद्रा sleep
तीर्थयात्रा pilgrimage
छाया shadow
मक्षिका a bee
गंगा the river Ganges
पाठशाला school
शोभा charm
ललना woman
लता creeper
बालिका a girl
माला a garland

अव्ययानि

कदा when ?
दिवा during the day
सम्यक् well, nice
न कदापि never
इव like
प्रातः morning
सायम् in the evening
कदापि sometimes
संप्रति now, at present
वत् like

धातवः

अधि + गम् I.to understand (अधिगच्छति)
अनु + भू I. to experience (अनुभवति)
आ + नी I.to bring (आनयति)
सिच् (सिंच्) VI. to sprinkle(सिंचति)
भूष् X.to adorn (भूषयति)
नन्द् I. to rejoice, to be glad (नन्दति)

विशेषणानि

निर्जीव lifeless
बहु many
मुख्य chief
भीत frightened
सजीव endowed with life
मधुर melodious, sweet

अभ्यासाः

I. Translate the following into English :

1. ललनाः उद्यानस्य शोभां पश्यन्ति, आनन्दम् अनुभवन्ति च ।
2. बुधः क्षमया दुष्टान् जयति ।
3. भक्ता गंगायाः जले स्नानं कुर्वन्ति ।
4. अलसाः बाला बालिकाश्च पाठशालां न कदापि गच्छन्ति ।
5. सचिवाः सभायां नृपं नमस्कुर्वन्ति ।
6. आचार्यस्य कृपया छात्राः तत्त्वं सम्यक् अधिगच्छन्ति ।
7. रमायाः रमणः कृष्णः, उमायाः कान्तः शंकरः ।
8. सेवकाः नृपस्य आज्ञया वनं गच्छन्ति, काष्ठानि आनयन्ति च ।
9. पवनेन लताभ्यः कुसुमानि पतन्ति ।
10. पुष्पाणां मालाभिः देवतायाः कण्ठो विलसति ।
11. संप्रति जनाः निशायामपि क्रीडन्ति ।

12. अहं प्रतिदिनं सायं प्रातश्च देवताः पूजयामि।
13. यूयमुद्याने लतासु रम्याणि कुसुमानि पश्यथ।
14. मेघो जलेन वृक्षान् लताश्च सिंचति।
15. कृष्णो मथुरायाः द्वारकां (द्वारिकां) गच्छति।
16. भाषासु मधुरा मुख्या च संस्कृतभाषा।
17. आचार्यस्य कन्ये पाठशालायां क्रीडतः।
18. निशा चन्द्रेण विलसति।
19. बालिकाः देवतायै कुसुमानां मालाः आनयन्ति।
20. जनकाः वीराणां कथाः कथयन्ति।
21. ललने गंगायाः तीरे तिष्ठतः।

II. Translate the following into Sanskrit :

1) Patience is the weapon of good men.
2) The meeting of Ganga and Yamuna is at Prayaga.
3) An old man goes to pilgrimage with his wife.
4) The sound of the Sanskrit language is melodious.
5) Minister gives garlands to girls.
6) Ganga adorns India like a jewel.
7) Sun's brilliance is in the day.
8) Students obey teacher's order.
9) Boys rejoice reading the stories of Panchatantra.
10) At the end of the Yagna, people give Dakshinaa to the Brahmanas.
11) The bee's poison is on its head.
12) Rama stayed in the forest along with Sita.
13) Sleep is the medicine for many diseases.
14) People sit in the shade of a tree.
15) Women are fond of learning fine arts.

16) People become frightened with diseases.

17) Pyre burns the lifeless, but worries the living.

18) The charm of lamps is on the Deepawali festival.

III. Split and name the Sandhis :

1. रामेति 2. मृगाश्चरन्ति 3. हिमालयो नाम 4. महर्षिः 5. विद्यार्थी
6. परोपकारः 7. अत्रैवागच्छ 8. अद्यैव 9. दासोऽहम् 10. सदैव
11. नीलोत्पलम् 12. शिथिलाश्च 13. रामस्तिष्ठति 14. हरिरागतः
15. रामो राजमणिस्सदा 16. अनन्याश्चिन्तयन्तो माम् ।

IV. Derive the middle words so as make the sentences meaningful:

Example : *भक्तः 'देवाय नमः' इति वदति ।*

भक्तः	देव	नमः इति वदति ।
जनकाः	पुत्र	धनं यच्छन्ति ।
अर्जुनः	कृष्ण सह	गच्छति ।
कृष्णः	कंस	अलम् ।
भक्तः	देव	नमति ।
सचिवः	भट विना	न गच्छति ।
छात्राः	आचार्य सम	न भवन्ति ।
अश्वः	वेग एव	धावति ।
नराः	अन्न विना	न जीवन्ति ।
प्रभुः	सेवक	कुप्यति ।
बहुजनाः	आम्रफल	स्पृहयन्ति ।
गंगा	हिमालय	निर्गच्छति ।
उद्यानं	पुष्प विना	न विलसति ।
माता	पुत्र	सदा स्निह्यति ।
लवः	राम	पुत्रः ।
पिता	पुत्र विजय	नन्दति ।

एकादशः पाठः (Lesson - 11)

इकारान्तः पुंलिङ्गः 'कवि' शब्दः

वि.	एक.	द्वि.	बहु.
प्र.	कवि	कवी	कवयः
सं.प्र.	कवे	"	"
द्वि.	कविम्	"	कवीन्
तृ.	कविना	कविभ्याम्	कविभिः
च.	कवये	"	कविभ्यः
प.	कवेः	"	"
ष.	"	कव्योः	कवीनाम्
स.	कवौ	"	कविषु

उकारान्तः पुंलिङ्गः 'तरु' शब्दः

वि.	एक.	द्वि.	बहु.
प्र.	तरुः	तरू	तरवः
सं.प्र.	तरो	"	"
द्वि.	तरुम्	तरू	तरून्
तृ.	तरुणा	तरुभ्याम्	तरुभिः
च.	तरवे	"	तरुभ्यः
प.	तरोः	"	"
ष.	"	तर्वोः	तरूणाम्
स.	तरौ	"	तरुषु

The following two nouns are derived irregularly:

इकारान्तः पुंलिङ्गः 'पति' शब्दः

वि.	एक.	द्वि.	बहु.
प्र.	पतिः	पती	पतयः
सं.प्र	पते	"	"
द्वि.	पतिम्	"	पतीन्
तृ.	पत्या	पतिभ्याम्	पतिभिः
च.	पत्ये	"	पतिभ्यः
प.	पत्युः	"	"
ष.	"	पत्योः	पतीनाम्
स.	पत्यौ	"	पतिषु

इकारान्तः पुंलिङ्गः 'सखि' शब्दः

वि.	एक.	द्वि.	बहु.
प्र.	सखा	सखायौ	सखायः
सं.प्र.	सखे	"	"
द्वि.	सखायम्	"	सखीन्
तृ.	सख्या	सखिभ्याम्	सखिभिः
च.	सख्ये	"	सखिभ्यः
प.	सख्युः	"	"
ष.	"	सख्योः	सखीनाम्
स.	सख्यौ	"	सखिषु

नियमाः -

1. पति at the end of a समास is derived like कवि e.g. श्रीपतिना, श्रीपतये

2. सखि is changed to सख at the end of a समास e.g. रामसखः
3. An adjective (विशेषण) can be converted into an adverb (अव्यय) by putting it in Neuter (नपुंसक), Accusative (द्वितीया) singular number (एकवचनम्)

For example: - मन्द = slow, but when changed to मन्दम् = slowly. शनिः मन्दं चलति। लता सुम्दरं गायति।

शब्दसंग्रहः
(पुंलिङ्गशब्दाः)

अग्निः fire
अतिथिः guest
असिः sword
अलिः a bee
अन्धकारः darkness
अरिः an enemy
उदयः rise
धूमः smoke
देहः body
क्लेशः pain
कृषिकः a farmer
ऋषिः a sage
गिरिः a mountain
पतिः master/husband
रविः Sun
भूपतिः a king
नृपतिः a king
व्याधिः disease
यतिः an ascetic
शनिः the planet Saturn
सेनापतिः a commander
कलिः quarrel
तिथिः date
गुरुः teacher / any respectable person
तरुः a tree (lit. Protector)
परशुः an axe
पशुः an animal
प्रभुः a master / lord

भानुः Sun	वायुः air
शिशुः an infant	सूनुः a son
इन्दुः Moon	हेतुः reason / cause
तृणराशिः a heap of grass	हरिः Lord Hari
आखुः a rat	ओतुः a cat

(नपुं)

मित्रम् a friend	हितम् useful / welfare
धान्यम् grain	कारणम् cause
शयनम् a bed / lying down	बिलम् hole

(स्त्री)

शाखा a branch	सेना army

(विशेषणानि)

मन्द slow, dull	शान्त calm	कुपित angry
पीत yellow	प्रथम first	

(धातवः)

गै (गाय्) I. to sing (गायति)	कूज् I. to coo (कूजति)
कृत् (कृन्त्) VI. to cut (कृन्तति)	शम् (शाम्) IV. to grow calm (शाम्यति)
क्रन्द् I. to cry (क्रन्दति)	[**आसीत्** was (III.sing]

(अव्ययानि)

इतः ततः here and there	पुरतः before, in front of +VI case
कृते for the sake of + VI case	समक्षम् in the presence +VI case

अभ्यासाः

I. Translate the following into English :

1) ऋषयो वने आश्रमेषु वसन्ति।
2) अजाः गिरेः ग्रामं गच्छन्ति।
3) व्याधयो जनान् पीडयन्ति।
4) भृत्यः प्रभोराज्ञां विना वृक्षं परशुना कृन्तति।
5) यतिर्देहं योगेन त्यजति।
6) जगद्गुरुः कृष्णः शिष्यमर्जुनं गीतामुपदिशति स्म।
7) वायुना तरूणां शाखाः इतस्ततश्चलन्ति।
8) अतिथीनां कृते फलानि आनयामि।
9) परशुरामः परशुना क्षत्रियान् जयति स्म।
10) सेवकः बाहुभ्यां शिलामुन्नयति।
11) रवेरुदयेनान्धकारो नश्यति।
12) पुत्रयोः कलिना जनकः कुपितः।
13) बालाः भानोरुदये शयनात् उत्तिष्ठन्ति।
14) शिष्याः गुरोर्गृहे वसन्ति।
15) अग्निर्वायोः सखा, अत एव वायुसखः।
16) अभिमन्युः अरिषु तृणराशौ अग्निरिवासीत्।
17) सेनापतेराज्ञया बहवः सैनिकाः समरं कुर्वन्ति।
18) वर्षस्य बिन्दवो वृक्षात् पतन्ति।
19) हरेः समक्षं देवास्तिष्ठन्ति।
20) गोपालः सूनुन् पाठशालां नयति।
21) कवयः सदा नृपतिं वर्णयन्ति।
22) सम्प्रति सैनिकाः असीन् न वहन्ति।
23) यदा ओतवः आगच्छन्ति तदाखवः बिलेषु प्रविशन्ति।

II. **Translate the following into Sanskrit :**

1) People stand in front of minister's house.
2) Guests have no date.
3) The water of the sea is never calm.
4) Thieves hide money below a tree.
5) Ministers and poets sit before a king.
6) The Pandavas hid weapons on the Shami tree.
7) Farmer brings home a heap of corn.
8) Anxiety is the cause of diseases.
9) In the hermitages of sages, disciples water trees.
10) Sometimes the infants cry without cause.
11) Valmiki is the first poet of Sanskrit language.
12) Diseases calm down due to Yoga.
13) Today a guest comes to Gopal's home.
14) At the hermitages, sage alone is the teacher.
15) Leaves of trees are green.
16) There are flowers and birds on trees.
17) Birds sit there and coo sweetly.
18) People prostrate the Sun and pray for health.
19) The clothes of Hari are yellow.
20) The Saturn is Sun's son.

III. **Correct the following sentences :**

1) बालाः गृहं बहिर्गच्छन्ति ।
2) देवात् प्रसादेन सुखं जीवामः ।
3) वृक्षाणां शाखासु बहुपुष्पाः सन्ति ।
4) बालाः कन्दुकं क्रीडन्ति ।

5) भिक्षुकाः अन्नं प्रतिगृहं गच्छन्ति।

6) निषादः मृगं बाणं क्षिपति।

7) छात्राः अध्यापकस्य दर्शनम् उत्तिष्ठन्ति।

8) कविस्य काव्यं सुन्दरमस्ति।

9) विद्येन ज्ञानं संभवति।

10) अर्जुनः आचार्यः द्रोणस्य शिष्यः।

*****

द्वादशः पाठः(Lesson – 12)

1. In Sanskrit, verbs are divided into two major classes (गणाः) known as **परस्मैपदम्** and **आत्मनेपदम् ।** The former is supposed to be used when the result of an action is meant for another, while the latter (**आत्मनेपदम्)** when the result of an action is obtained by the agent (**कर्ता)**

For example: **पाचकः पचति -- पाचकः पचते (आत्मनेपदम्)**

But this distinction is not followed strictly and instead both the classes are found to be used one for another. Though the conjugational / class signs (**विकरणप्रत्ययाः)** added to the roots are similar in both the Padams, the personal terminations (**पुरुषप्रत्ययाः)** are different. All the roots introduced in the previous lessons, belong to the **परस्मैपदम्** class. The present lesson deals exclusively with **आत्मनेपदम् ।**

वर्तमानकालः (पुरुषप्रत्ययाः)

प्र.पु.	**ते**	**इते**	**अन्ते**
म.पु.	**से**	**इथे**	**ध्वे**
उ.पु.	**इ**	**वहे**	**महे**

भाष् (to speak) I.A

III	**भाषते**	**भाषेते**	**भाषन्ते**
II	**भाषसे**	**भाषेथे**	**भाषध्वे**
I	**भाषे**	**भाषावहे**	**भाषामहे**

युध् (to fight) IV.A

III	**युध्यते**	**युध्येते**	**युध्यन्ते**
II	**युध्यसे**	**युध्येथे**	**युध्यध्वे**
I	**युध्ये**	**युध्यावहे**	**युध्यामहे**

लज्ज् (to feel shy) VI.A

III	**लज्जते**	**लज्जेते**	**लज्जन्ते**
II	**लज्जसे**	**लज्जेथे**	**लज्जध्वे**
I	**लज्जे**	**लज्जावहे**	**लज्जामहे**

मृग् (to seek, to hunt) **X.A**

III	**मृगयते**	**मृगयेते**	**मृगयन्ते**
II	**मृगयसे**	**मृगयेथे**	**मृगयध्वे**
I	**मृगये**	**मृगयावहे**	**मृगयामहे**

1. Apart from the above two Classes, there is yet another class of verbs called **उभयपदम्** which can be conjugated in both the Padams as **सूदः पचति / पचते** – **भजति / भजते**
2. When prepositions are added, certain roots chage their Padam.

The root **जि** (to win) (जय्) **I.P** जयति**,** when prefixed with वि**,** it changes to Atmanepada **विजयते**. The root **रम्** I.A (to rejoice) रमते**,** but with वि+रम् = विरमति **(**stops). The root गम् – गच्छति with सम् becomes Atmanepada as संगच्छते **(**joins together)

शब्दसंग्रहः

(पुं)

तापसः ascetic
पक्षः fortnight
प्रहारः attack
भेकः a frog
महिषः a buffalo
शुक्लपक्षः the bright fortnight
साधुः a virtuous person
स्नेहः affection, friendship
वैदेशिकः a foreigner
मुनिः a sage
मोक्षः salvation
दुःखालयः an abode of misery
दण्डः punishment
जनः people
दोषः a mistake
पिता father **(ऋकारान्तः)**
नीचः a low-spirited one
श्रद्धालुः faithful person

(स्त्री)

कला a phase of the moon
परीक्षा examination
रक्षा protection

(नपुं)

कथनम् telling
कार्यम् work
चित्तम् mind
विघ्नभयम् fear of obstacle
ध्यानम् meditation
अशौचम् impurity
कल्यानम् welfare
वचनम् words
मतम् vote (opinion)
पल्वलम् pond

(विशेषणानि)

कातर timid
भीरु cowardly
प्रबल strong
निर्धन poor
संयतेन्द्रिय self-controlled

(अव्ययम्)

प्रायः generally, mostly

(सर्वनाम)

एतस्मिन् in this | तस्य his

(धातवः)

अय् with परा **(**I.A.) to flee (पलायते)

प्र + अर्थ् **(**X.A) to request, to ask (प्रार्थयते)

जन् (जा IV.A) to be born, to result (जायते)

मन्त्र् (X.A) to consult (मन्त्रयते)

मस्ज् (मज्ज् (VI.P) to bathe, to plunge (मज्जति)

मृग् (X.A) to search (मृगयते)

याच् **(**I.A) to beg, to request (याचते)

प्रारभ् (I.A) to start (प्रारभते)

लज्ज् (VI.A) to feel shy (लज्जते)

वन्द् (I.A) to salute, to praise (वन्दते)

श्लाघ् **(**I.A) to praise (श्लाघते)

मुद् (मोद् I.A) to rejoice (मोदते)

रुच् (रोच् I.A) to be pleased, to like (रोचते)

गाह् with अव (I.A) to dive into, to bathe in (the **अ** of **अव** is often dropped) (वगाहते)

वेप् **(**I.A) to tremble (वेपते)

यत् (I.A) to strive(यतते)

वृत् (वर्त् I.A) to be (वर्तते)

विफलीभू (I.P) to fail (विफलीभवति)

शुभ् (शोभ् I.A) to shine (शोभते)

वृध् (वर्ध् I.A) to grow (वर्धते)

लभ् (I.A) to get (लभते)

सेव् (I.A) to serve (सेवते)

शिक्ष् (I.A) to learn, practice (शिक्षते)

डी (डय् I.A) to fly (डयते)
क्षम् (I.A) to endure, forgive (क्षमते)
परीक्ष् (I.A) to examine (परीक्षते)
मृ (म्रिय् VI.A) to die (म्रियते)
कम्प (I.A) to shake (कम्पते)

अभ्यासाः

I. Translate the following into English :

1. चोरः असत्यस्य कथने न लज्जते।
2. भक्ताः प्रतिदिनम् ईश्वरं वन्दन्ते तस्य ध्याने रमन्ते च।
3. निर्धनाः धनिकं सेवन्ते।
4. लताः प्रबलेन वायुना कम्पन्ते।
5. पिता पुत्रस्य विजयेन मोदते।
6. संप्रति भारते बहवो व्याघ्राः म्रियन्ते।
7. सुवर्णकारः मणीन् न परीक्षते।
8. विद्या विनयेन शोभते। छात्रास्तु विद्यया शोभन्ते।
9. अर्जुनः आचार्यद्रोणात् अस्त्राणि शिक्षते स्म।
10. नगरेषु व्याधयो वर्धन्ते।
11. एतस्मिन् दुःखालये लोके सुखं मृगयन्ते मानवाः।
12. यथा भक्तिः हरये रोचते तथा अभिषेको हराय।
13. भक्ताः गंगायां वगाहन्ते।
14. कुरुक्षेत्रे कौरवाः युध्यन्ते स्म।
15. विहंगाः उद्याने तरोस्तरुं डयन्ते।
16. सूनुः पितरं *धनं* याचते। (*the root याच् is द्विकर्मक*)
17. सज्जना एव सज्जनानां गुणान् श्लाघन्ते।
18. वयं बालैः सह न मन्त्रयामहे।
19. बहूनां मानसं विद्यायां न रमते।

20. साधवो लोकस्य रक्षायै प्रार्थयन्ते ।
21. अशौचात् रोगाः वर्धन्ते ।
22. नीचाः विघ्नभयेन कार्यं न प्रारभन्ते ।
23. संयतेन्द्रियाः श्रद्धालवः ज्ञानं लभन्ते ।
24. बहवो वैदेशिकाः संस्कृतं शिक्षन्ते ।

II. <u>Translate the following into Sanskrit</u> :

1. Leaders are fond of votes.
2. Thief trembles due to the fear of punishment.
3. Nowadays, there is attack in the battle even at night.
4. Students begin the study of grammar at school.
5. The wicked do not rejoice at the welfare of the good.
6. Students get the books from the market.
7. Brave soldiers fight but the cowards flee.
8. In monsoon frogs are born in every pond.
9. King strives for the welfare of people.
10. Affecton and quarrel result from words.
11. There are beautiful flowers in the garden.
12. People respect poets and students teachers.
13. Devotees plunge in the water of Ganga.
14. Night shines with the moon and the moon with the night.
15. During the bright fortnight, moon's phases increase.
16. Lazy boys alone fail in the exams.
17. The stars do not shine during the day.
18. Ascetics reoice in the meditation of God.

III. **Conjugate in present tense in all the three persons :**

वि+ जि । जन् । शिक्ष् । रुच् । वन्द् । लभ् । वृत्

IV. **Recognise the following :**

वर्धन्ते । विरमामि । जाये । पलायन्ते । मन्त्रयामहे । परीक्षे । वन्दसे । मृगयते । प्रारभे ।

त्रयोदशः पाठः (Lesson – 13)

ईकारान्तः स्त्रीलिङ्गो 'नदी' शब्दः ।

वि.	एक.	द्वि.	बहु.
प्र.	नदी	नद्यौ	नद्यः
सं.प्र.	नदि	"	"
द्वि.	नदीम्	"	नदीः
तृ.	नद्या	नदीभ्याम्	नदीभिः
च.	नद्यै	"	नदीभ्यः
प.	नद्याः	"	"
ष.	"	नद्योः	नदीनाम्
स.	नद्याम्	"	नदीषु

Variations in **लक्ष्मी** and **श्री** nouns:

(The प्रथमा एकवचन **of** लक्ष्मी is **'**लक्ष्मीः' and the rest like नदी**)**

ईकारान्तः स्त्रीलिङ्गः 'स्त्री' शब्दः

वि.	एक.	द्वि.	बहु.
प्र.	स्त्री	स्त्रियौ	स्त्रियः
सं.प्र	स्त्रि	"	"
द्वि.	स्त्रियम् / स्त्रीम्	"	" / स्त्रीः
तृ.	स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
च.	स्त्रियै	"	स्त्रीभ्यः
प.	स्त्रियाः	"	"
ष.	"	स्त्रियोः	स्त्रीणाम्
स.	स्त्रियाम्	"	स्त्रीषु

ईकारान्तः स्त्रीलिङ्गः 'श्री' शब्दः

वि.	एक.	द्वि.	बहु.
प्र.	श्रीः	श्रियौ	श्रियः
सं.प्र.	श्रीः	"	"
द्वि.	श्रियम्	"	"
तृ.	श्रिया	श्रीभ्याम्	श्रीभिः
च.	श्रियै / श्रिये	"	श्रीभ्यः
प.	श्रियाः / श्रियः	"	"
ष.	" "	श्रियोः	श्रीणाम् / श्रियाम्
स.	श्रियाम् / श्रियि	"	श्रीषु

(एवं ह्री, धी,भी प्रभृतयः)

ऊकारान्तः स्त्रीलिङ्गो 'वधू' शब्दः ।

वि.	एक.	द्वि.	बहु
प्र.	वधूः	वध्वौ	वध्वः
सं.प्र	वधु	"	"
द्वि.	वधूम्	"	वधूः
तृ.	वध्वा	वधूभ्याम्	वधूभिः
च.	वध्वै	"	वधूभ्य
प.	वध्वाः	"	"
ष.	"	वध्वोः	वधूनाम्
स.	वध्वाम्	"	वधूषु

(एवं चमू, श्वश्रू प्रभृतयः)

अयादिसन्धिः

3.a. When **ए, ऐ, ओ, औ** are followed by a vowel, they are changed to **अय्, अव्, आय्, आव्** respectively, हरे + इति = हरयिति
दास्यै + अयच्छत् = दास्यायच्छत्
गुरो + एवम् = गुरवेवम्
पितरौ + अत्र = पितरावत्र

3.b. The य् and व् parts of the substitutes may be dropped optionally, if they are at the end of a word when preceded by **अ** or **आ** and followed by a vowel or a soft consonant, e.g. **हरे + इति** = हरयिति (हरय् इति) or **हर इति ।**

दास्यै + अयच्छत् = दास्याययच्छत् = (दास्याय् अयच्छत्) or दास्या अयच्छत्
।
पितरौ + अत्र = पितारावत्र (पितराव् अत्र) **or** पितरा अत्र ।

3.c. The two vowels thus brought together by the optional dropping of the **य्** and **व्** cannot further be joined by other Sandhi rules.

शब्दसंग्रहः

विजयः victory

प्रभवः source

वर्णः colour

पराक्रमः valour

सूत्रधारः a stage-manager

आरम्भःbegining

(स्त्री)

कौमुदी moonlight

जननी mother

दासी a maid servant

नदी a river

पत्नी wife

पुरी a city

राजधानी a capital city

काशी the sacred city Kaashi

विद्या knowledge, learning

श्रीः goddess Lakshmi, prosperity

सखी a female companion

भगिनी a sister

चमूः army

तरुणी a young lady

नगरी a town, city

नारी a woman

पुत्री a daughter

महिषी queen

वधूः a bride, daughter-in-law

वापी a lake

वेणी a braid of hair

श्वश्रूः **a** mother-in-law

सिंही lioness

जरा oldage

वाणी speech, language

गृहिणी a home-maker

नटी an actress

प्रजा progeny, subjects

राज्ञी a queen, princess

(नपुं)

सौभाग्यम् prosperity

भार**तवर्षम्** India

सलिमम् water

आगमनम् arrival

सौन्दर्यम् beauty

नृत्यम् dance

साहित्यम् literature

नगरम् a city

(धातवः)

पुष् (IV.P) to nourish (पुष्यति)

राज् (I.A) to shine

वि+राज् (I.A) to shine

परि+नी (I.P) to marry (परिणयति)

भूष् (I.P & X.U) to adorn

हृ (हर् I.P) to take away, to fascinate

आ+प्रच्छ् (VI.A) to take leave (आपृच्छते+II case)

अलंकरोति beatifies / decorates

उच्यते is called (passive.sing)

पूज्यते is respected (pass.sing)

पूज्यन्ते are respected (pass.plu)

आहुः = they say (present tense of ब्रू II.U) **[III.**आह आहतुः आहुः]

(विशेषणानि)

धवल white

बहु many (बहुः(पुं),बह्वी (स्त्री)

वृद्ध old

द्वितीय the second

स्वीय / स्वकीय / स्व / निज one's own

पुण्य sacred

प्रत्यागत returned

श्वेत white

संस्कृत refined / cultured

(अव्ययम्)

क्रीडितुम् to play

अभ्यासाः

I. Translate the following onto English :

1. जलं पृथिव्याः एकममूल्यं रत्नमस्ति।
2. जरा सिंही इव तिष्ठति।
3. संस्कृता वाणी एव भूषयति जनान्।
4. न हि गृहं गृहमित्याहुः, गृहिणी गृहमुच्यते।
5. जनन्याःआगमनेन बाला अतीव तुष्यन्ति।
6. यत्र नार्यः पूज्यन्ते तत्र रमन्ते देवताः।
7. नृपतिः राज्ञ्याः समीपे तिष्ठति।
8. गोपालो जननीम् आह्वयति।
9. रामो जनकस्य पुत्रीं परिणयति स्म।
10. रक्षाबन्धनोत्सवे भगिन्यै धनं यच्छन्ति।
11. वनात् राजधानीम् आगता जानकी श्वश्रूः वन्दते स्म।
12. निशायां बालकाः कौमुद्यां क्रीडन्ति।
13. दास्यौ वाप्या जलमानयतः।
14. जननी पुत्रीषु अतीव स्निह्यति।

15. ग्रीष्मे नदीनां सलिले नार्यः क्रीडन्ति।

16. तरुणीनां वेणीषु पुष्पाणि सन्ति।

17. सरस्वती विद्यायाः देवता, लक्ष्मीः सौभाग्यस्य, दुर्गा पराक्रमस्य च।

18. अतो जना दुर्गायाः लक्ष्म्याः सरस्वत्याश्च पूजां कुर्वन्ति।

19. श्रियः पतिः विष्णुः गुरुवायुपुरे, द्वारकापुर्यां, मथुरानगर्यां च विराजते।

20. नदी वृक्षान् जननीव सदा पुष्यति।

21. रुक्मिणी सत्यभामा च देवक्या वध्वौ स्तः।

22. रामस्य दर्शने राक्षसानां चमूः पलायते।

II. Translate the following into Sanskrit :

1. The manager of the play calls the actress.
2. Daughter of Laxmi learns dancing.
3. Parvati's beauty captivates the mind of Siva.
4. In the beginning of the drama, the chief actor calls his wife.
5. Panchatantra, a gem among the story books, adorns the Sanskrit literature.
6. Radha calls her (female) friend to play.
7. King Dilipa protected his subjects as his own children.
8. Prahlada takes leave of (his) father and goes to the teacher.
9. Jānakī and Urmilā are Dasharatha's daughters-in law.

10. In summer there is no water in the Vegavati, but there is plenty of water in Kaveri.
11. The Godavari's source is on the Sahyadri near Panchavati.
12. Bhagirathi and Krishnaveni are sacred rivers.
13. There are many rivers and cities in India.
14. Swan's colour is white like the moon.
15. Mother gets pleased at the victoty of her daughter.
16. Bhima is the second son of Kunti.
17. Kaikeyi is the third daughter-in-law of Aja.
18. Maid servant obeys the order of the queen.
19. An old man goes to Kasi with (his) wife.

*****

चतुर्दशः पाठः (Lesson – 14)

(सर्वनामानि)

अकारान्तः पुंलिङ्गः 'सर्व' शब्दः ।

वि.	एक.	द्वि.	बहु.
प्र.	सर्वः	सर्वौ	सर्वे
सं.प्र.	सर्व	"	"
द्वि.	सर्वम्	"	सर्वान्
तृ.	सर्वेण	सर्वाभ्याम्	सर्वैः
च.	सर्वस्मै	"	सर्वेभ्यः
प.	सर्वस्मात्	"	"
ष.	सर्वस्य	सर्वयोः	सर्वेषाम्
स.	सर्वस्मिन्	"	सर्वेषु

(एवं विश्व, एकतम, अन्य, इतर शब्दाः)

आकारान्तः स्त्रीलिङ्गः 'सर्वा' शब्दः ।

वि.	एक.	द्वि.	बहु.
प्र.	सर्वा	सर्वे	सर्वाः
सं.प्र.	सर्वे	"	"
द्वि.	सर्वाम्	"	"
तृ.	सर्वया	सर्वाभ्याम्	सर्वाभिः
च.	सर्वस्यै	"	सर्वाभ्यः
प.	सर्वस्याः	"	"

ष.	“	सर्वयोः	सर्वासाम्
स.	सर्वस्याम्	“	सर्वासु

अकारान्तो नपुंसकलिङ्गः ’सर्व’ शब्दः ।

वि.	एक.	द्वि.	बहु.
प्र.	सर्वम्	सर्वे	सर्वाणि
सं.प्र.	सर्व	“	“
द्वि.	सर्वम्	“	“

[The rest are like the masculine forms.]

नियमाः

1) Pronouns, except **अस्मद्** and **युष्मद्** are declined like **सर्व**.
2) Pronouns are declined separately in all the three genders.
3) Some pronouns like **सर्व, पूर्व, पर** have Vocative Case, but the pronouns that are given below do not have **संबोधनम् ।**

दकारान्तः “तद्” शब्दः । (He, She, It)

तद् (पुं) (He)

विभक्तिः	ए.व.	द्वि.व.	ब.व
प्र.	**सः** (he)	**तौ** (they both)	**ते** (they)
द्वि.	**तम्** (to/about him)	“ (to both of them)	**तान्** (to them)
तृ.	**तेन** (by/with hi	**ताभ्याम्** (by both of them)	**तैः** (by/with them)

च.	**तस्मै** (for him)	"(for both of them)	**तेभ्यः** (for them)
पं.	**तस्मात्)** (from/than him	" (from/than both of them)	"(from/than them)
ष.	**तस्य** (his)	**तयोः** (of both of them)	**तेषाम्** (their)
स.	**तस्मिन्** (in him)	" (in both of them)	**तेषु** (in them)

दकारान्तः "तद्" शब्दः । (He, She, It)

तद् (स्त्री) (She)

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	सा (she)	ते (they both)	ताः (they [fem])
द्वि.	ताम् (about/to her)	" (about/to both of them)	" (about/to them)
तृ.	तया (by/with her)	ताभ्याम् (by/with both of them)	ताभिः (by/ with them)
च.	तस्यै (for/to her)	" (for/ to both of them)	ताभ्यः (for/to them)
पं.	तस्याः (from her)	" (from both of them)	" (from them)
ष.	" (her/of her)	तयोः (of both of them)	तासाम् (their)
स.	तस्याम् (in her)	" (in both of them)	तासु (in them)

दकारान्तः नपुंसकलिङ्गः 'तद्' शब्दः

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	तत् (that/it)	ते (those two)	तानि (those)
द्वि.	" (about/ to that)	" (about/to those two)	" (about/ to those)

NOTE :-(The rest are derived similar to 'तद्' Masculine Noun from III to VII Case)

दकारान्तः पुंलिङ्गः 'एतद्' शब्दः ।(This)

विभक्तिः	ए.व.	द्वि.व.	ब.व.
प्र.	एषः	एतौ	एते
द्वि.	एतम् / एनम्	एतौ / एनौ	एतान् / एनान्
तृ.	एतेन / एनेन	एताभ्याम्	एतैः

[The rest are like the masculine तद् Masculine]

Note:-[इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥]

[इदम् is used with reference to a person or thing near at hand and एतद् to one nearer still, अदस् is used of a person or thing at a distance, while तद् is used of one that is absent.]

दकारान्तः स्त्रीलिङ्गे 'एतद्' शब्दः ।(This)

विभक्तिः	ए.व.	द्वि.व.	ब.व.
प्र.	एषा	एते	एताः
द्वि.	एताम् / एनाम्	एते / एने	एताः / एनाः
तृ.	एतया / एनया	एताभ्याम्	एताभिः

[The rest are like the feminine तद्]

दकारान्तःनपुंसकलिङ्गः 'एतद्' शब्दः । (This)

विभक्तिः	ए.व.	द्वि.व.	ब.व.
प्र.	**एतत्**	**एते**	**एतानि**
द्वि.	**एतत्**	**एते**	**एतानि**

Note:[The rest of the forms are derived by adding 'ए' to the 'तद्' in all the three genders]

दकारान्तः पुंलिङ्गः 'यद्' शब्दः

(who, which, what in a relative sense)

विभक्तिः	ए.व.	द्वि.व.	ब.व
प्र.	यः (the one who)	यौ	ये
द्वि.	यम्	यौ	यान्
तृ.	येन	याभ्याम्	यैः

[The rest are to be deived like masculine 'तद्']

दकारान्तः स्त्रीलिङ्गः 'यद्' शब्दः

(who, which, what in a relative sense)

विभक्तिः	ए.व.	द्वि.व.	ब.व.
प्र.	**या**	**ये**	**याः**
द्वि.	**याम्**	**ये**	**याः**
तृ.	**यया**	**याभ्याम्**	**याभिः**

[The rest are to be derived like feminine 'तद्']

दकारान्तः नपुंसकलिङ्गः 'यद्' शब्दः

(which, what in a relative sense)

विभक्तिः	ए.व.	द्वि.व.	ब.व
प्र.	**यत्**	**ये**	**यानि**
द्वि.	**यत्**	**ये**	**यानि**

[The rest are to be derived like masculine 'तद्']

मकारान्तः पुंलिङ्गः 'किम्' शब्दः ।

(who ? what ? as an interrogative)

विभक्तिः	ए.व.	द्वि.व.	ब.व
प्र.	कः	कौ	के

द्वि.	कम्	कौ	कान्
तृ.	केन	काभ्याम्	कैः

[The rest are to be derived like masculine 'तद्']

मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः ।

(who ? what ? as an interrogative)

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	**का**	**के**	**काः**
द्वि.	**काम्**	**के**	**काः**
तृ.	**कया**	**काभ्याम्**	**काभिः**

[The rest are to be derived like feminine 'तद्']

मकारान्तः नपुंसकलिङ्गः "किम्" शब्दः ।

(what ? as an interrogative)

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	किम्	के	कानि
द्वि.	"	"	"

[The rest are to be derived like masculine 'तद्']

Pronominal Adjective "अन्य" पुंलिङ्गे (Masculine)

[another, different]

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	अन्यः	अन्यौ	अन्ये
द्वि.	अन्यम्	"	अन्यान्
तृ.	अन्येन	अन्याभ्याम्	अन्यैः

[The rest are to be derived like masculine 'तद्']

"अन्य" स्त्रीलिङ्गे (In feminine)

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	अन्या	अन्ये	अन्याः
द्वि.	अन्याम्	"	"
तृ.	अन्यया	अन्याभ्याम्	अन्याभिः

[The rest are to be derived like feminine 'तद्']

"अन्य" नपुंसके (In neuter gender)

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**
प्र.	अन्यत्	अन्ये	अन्यानि
द्वि.	"	"	"

[The rest are like the Masculine 'तद्']

3. **NOTE:-** *The above Pronouns are not declined in Vocative Case.*

4. The addition of चित् , चन , or अपि to the interrogative pronoun **'किम्'** in all its genders, cases and numbers gives an indefinite sense.

कश्चित् , कश्चन , कोऽपि बालः = a certain (unknown) boy.
काचित् , काचन , कापि कन्या = a certain (unknown) girl.
कैश्चित् नरैः = by some men
कानिचित्, कानिचन, कान्यपि फलानि = some fruits
किञ्चित् पुस्तकम् = some book

विसर्गसन्धि in relation to **'तद्'**& 'एतद्' in Poetry

5a. The विसर्ग of the Nominative singular of तद् and एतद् (पुं) is dropped before a consonant,

e.g. स शम्भुः , एष विष्णुः ।

5b. Sometimes in poetry, the विसर्ग of सः and एषः is considered as not existing when followed by a vowel other than 'अ', so that the two vowels may combine in order to meet the requirments of meter, e.g. सैष दाशरथी रामः सैष राजा युधिष्ठिरः । सैष कर्णो महात्यागी सैष भीमो महाबलः॥

शब्दसंग्रहः

(पुं)

निर्धनः poor person	प्रणामः prostration
दर्भः darba grass	धर्मः duty, virtue
पण्डितः a scholar	रिपुः enemy
विनयः modesty	स्वर्गः heaven
होमः sacrificial oblation	धनिकः rich person
वर्षाकालः monsoon	राष्ट्रीयपुरस्कारः national award
दुःखशमनः destroyer of sorrow	कोशः / कोषः treasury

(स्त्री)

अत्याशा greed	श्रद्धा faith / curiosity

(नपुं)

प्रावीण्यं – proficiency	अरण्यं – forest
अभिधानं – name	आलस्यं – laziness
आज्यं – ghee	रूप्यकं – rupee
मूल्यं – price	वित्तं – money
वस्त्रं – cloth	शौर्यं – bravary
बहुमानं – gift, award	सर्वभूतानि – all beings

(धातवः)

उप+कृ to help (VIII.U)

आ+चर् (I.P) to perform

मन् (IV.A) to think,consider

दीयते – is given (passive form)

पठ्यन्ते -- are read (passive)

श्रूयन्ते – are heard (passive)

अधि+गम् (अधिगच्छति) to get

लभ् to gain (I.A.)

(विशेषणानि)

कुलीन well-born

धन्य blessed

मृत dead

उत्सुक eager

अन्यतम one of many

पर supeme

सदृश similar

तादृश like that

[तादृशः (पुं), तादृशी (स्त्री), तादृशं (नपुं)]

(अव्ययानि)

आत्मवत् equal to one's own self

नूनम् surely

परुत् last year

ज्ञातुम् to know

पठितुम् to read

अन्यत्र elsewhere

पुरा long ago

चिरं for a long time

(सर्वनामानि)

अन्य another, other, different

एक one (derived in singular only)

एतद् this

किम् who ? what? (Interrogative)

तद् he, she, it , that

यद् who (relative)

तद् + एव same

सर्व all

अभ्यासाः

I. Translate the following into English :

1. यस्तत्र तिष्ठति स मम मित्रम्।
2. ये संस्कृतं शिक्षन्ते ते एव संस्कृतं स्पृहयन्ति।
3. तेभ्यः कुशलेभ्यः छात्रेभ्यः पुस्तकं दीयते।
4. येन मधुर्नाम राक्षसो हतस्तस्मै मधुसूदनाय नमः।
5. न कोऽपि सर्वासु कलासु प्रावीण्यम् अधिगच्छति।
6. किं तया विद्यया प्रयोजनं या विनयं न यच्छति।
7. यस्यैतानि पुस्तकानि तस्यैव छात्रोऽहम्।
8. याः कथाः पञ्चतन्त्रे पठ्यन्ते तादृश्यः अन्यत्र न श्रूयन्ते।
9. एते कस्याः पुत्रा इति ज्ञातुम् इच्छामि।
10. बहवो जना वाल्मीकिना विरचितं रामायणमेव पठितुम् उत्सुकाः।
11. प्रणामो यस्य दुःखशमनस्तं नमामि हरिं परम्।
12. या बालिका तत्र क्रीडति सा उमायाः पुत्री।
13. कश्चित् नरः नद्यां स्नानं करोति।
14. कोऽत्रागच्छति ?
15. एतस्मिन् देशे बहवो धनिकाः सन्ति, तेषु अनिलः अन्यतमः।
16. यस्यास्ति वित्तं स नरः कुलीनः।
17. आत्मवत् सर्वभूतानि यः पश्यति सः पण्डितः।
18. एतस्मिन् आश्रमे बहवः मुनयो निवसन्ति।
19. तेषां शिष्याः अरण्यात् दर्भान् आहरन्ति।
20. तैस्ते सायंप्रातः होममाचरन्ति।
21. केचित् अन्नेनाज्येन च होमं कुर्वन्ति।
22. कस्यैतद् गृहम् ?
23. गोपालस्यैतद् गृहम्।

24. धन्यास्ते ये अरीणामपि हृदयानि जयन्ति ।

25. अत्राहं जीवामि, कं त्वं मृतं मन्यसे ?

26. बालिके ! का सा कन्या ? कस्यापत्यम् ? किमभिधानं तस्याः ?

II. Translate into Sanskrit :

1) Who is that man ?
2) What is his name ?
3) These are those boys who got the national award for bravery.
4) He alone, who has faith, gets knowledge
5) They come from that village of which I am the leader.
6) Rama lived in that forest for a long time with his younger brother and wife.
7) There is surely someone on the tree.
8) Every poor man wants some happiness in life.
9) What is the price of that book?
10) The price of this is 100 Rupees.
11) Only he, who has wealth, has friends.
12) There is a wealthy man in this city.
13) He daily gives food to the poor.
14) To some he gives clothes also.
15) During this monsoon, there is no other charity similar to this.
16) All praise him who always helps.
17) I think he will suely secure heaven.

18) Long ago, demons lived in this forest.

19) Now I am staying in the same forest along with (my) wife.

20) Oh lady! You are the daughter-in-law of that king.

III. Decline तद्, यद्, एतद् and किम् in all genders.

IV. Give the suitable interrogative pronoun किम् for the under-lined words.

1. लवः रामस्य पुत्रः ।
2. नृपः कोषात् धनं यच्छति ।
3. विद्या विनयं यच्छति ।
4. बालानां रोदनं बलम् ।
5. जनाः नयनाभ्यां पश्यन्ति ।
6. आलस्यात् परः रिपुर्नास्ति ।
7. अत्याशा अनर्थानां हेतुः ।
8. धनिकः भिक्षुकाय वस्त्रं यच्छति ।
9. जम्बुकः मांसं कूपे क्षिपति ।
10. जनानां हिताय यतामहे ।
11. कृष्णः देवक्याः वसुदेवस्य च नन्दनः ।
12. तेन सर्पः दृष्टः ।
13. तां कथां श्रोतुमिच्छति ।
14. तस्याः पुत्रः मम छात्रः ।
15. पिता तस्यै बालिकायै पुस्तकानि यच्छति ।

पञ्चदशः पाठः(Lesson – 15)

Personal Pronouns युस्मद् and अस्मद् (You & I)

(दकारान्तः 'युष्मद्'(You) शब्दः त्रिषु लिङ्गेषु समानः)

वि.	ए.व.	द्वि.व.	ब.व.
प्र.	त्वम्	युवाम्	यूयम्
द्वि.	त्वाम् / त्वा	" / वाम्	यूष्मान् / वः
तृ.	त्वया	युवाभ्याम्	युष्माभिः
च.	तुभ्यम् / ते	" / वाम्	युष्मभ्यम् / वः
पं.	त्वत्	"	युष्मत्
ष.	तव / ते	युवयोः / वाम्	युष्माकम् / वः
स.	त्वयि	"	युष्मासु

(दकारान्तः 'अस्मद्'(I) शब्दः त्रिषु लिङ्गेषु समानः)

वि.	ए.व.	द्वि.व.	ब.व.
प्र.	अहम्	आवाम्	वयम्
द्वि.	माम् / मा	" / नौ	अस्मान् / नः
तृ.	मया	आवाभ्याम्	अस्माभिः
च.	मह्यम् / मे	" / नौ	अस्मभ्यम् / नः
पं.	मत्	"	अस्मत्
ष.	मम / मे	आवयोः / नौ	अस्माकम् / नः
स.	मयि	"	अस्मासु

नियमाः

1.[The optional forms मा, मे, नौ, नः, त्वा, वाम्, वः are never used at the beginning of a sentence or a foot of metre. They are

also not to be used immediately before the particles च, वा, एव, हा and immediately after *Vocative form.*

As :-

मे गृहम् is incorrect, but मम गृहम् is correct.

त्वा पातु is incorrect, but त्वां पातु is correct

नः पाहि is incorrect, but अस्मान् पाहि is correct

तस्य मे वा पुस्तकम् is incorrect, but तस्य मम वा पुस्तकम् is correct

इदं पुस्तकं मे एव is incorrect, but इदं पुस्तकं ममैव is correct

हा मे दौर्भाग्यम् is incorrect, but हा मम दौर्भाग्यम् is correct

हरिस्त्वां मां च रक्षतु, कथं त्वां मां च न रक्षेत् ।

Beginning of a foot of metre as:- वेदैरशेषैः संवेद्योऽस्मान् (not नः) कृष्णः सर्वदाऽवतु ।

"May Lord Krishna, fit to be known by all the Vedas, always protect us"

Immediately after संबोधन as :- मित्र ! मम वाहनमेतत् (not मे वाहनम्) देव ! अस्मान् (not नः) रक्ष ।

यणादेशसन्धिः

1. When इ/ई, उ/ऊ, ऋ/ॠ or ऌ are followed by a dissimilar vowel, य्, व्, र् ,ल् are respectively substituted for them, as :

दधि + ओदनम् = दध्योदनम् (इ ⟶ य्)

इति + आदि = इत्यादि (इ ⟶ य्)

अभि + उदयः = अभ्युदयः (इ → व्)

सु + आगतम् = स्वागतम् (उ → व्)

पितृ + अंशः = पित्रंशः (ऋ → र्)

लृ + आकृतिः (लृ → ल्)
[a figure like लृ]

शब्दसंग्रहः

(पुं)

विवेकः discriminatory ability
विशेषः speciality
विश्रंभः confidence
गृहपाठः home work
निर्बन्धः insistence
वस्तुसंग्रहः museum
परितोषः contentment
अरातिः enemy
रागः affection
विदेशः foreign country
दोषः fault
दाराः wife
(always mas.plu)

(स्त्री)

प्रज्ञा intellect, wisdom
तृष्णा greed
ध्वनिमुद्रिका cassette
दर्वी a ladle
मतिः understanding
शृंखला an iron chain

(नपुं)

दर्शनगृहम् auditorium
वल्कलम् bark garment
अन्तरङ्गम् heart
भाजनम् repository / object
लोचनम् eye
दुकूलम् silk garment
त्राणम् protection

(धातवः)

विद् (IV.A.) to be (विद्यते)
प्र+भू (I.P.) to be able (प्रभवति)

श्रु (V.P.) to listen (शृणोति)
निन्द् (I.P.) to blame (निन्दति)
अर्ह् (I.P.) to deseve (अर्हति)
धाव् with प्र (I.P.) to run away (प्रधावति)
पाठ्यते causal passive of पठ् (is taught)
भवेत् (Potential of भू III.P) will be
वृत् with प्र (I.A.) to take place (प्रवर्तते)
ज्ञा (IX.U.) to know (जानाति)
नमस्यति – bows down (a denominative)
द्रु (I.P.) to melt (द्रवति) *आयोज्यते* – is conducted

(विशेषणानि)

दैनिक daily
अस्मदीय our, ours
मनोहर attractive / charming
उत्पन्न derived
विहीन devoid of
सम equal
विशाल large
जात happened (born)
मुक्त released/freed/open
दर्शनीय fit to be seen
योग्य eligible
भव्य excellent
सृष्ट created
पङ्गु lame
बहुश्रुत learned
परितुष्ट delighted /content
बद्ध bound

(अव्ययानि)

कति ? how many ?
प्रत्युत on the other hand
पृथक् apart from (+Vcase)
द्विवारं twice
अपि च more over
अधस्तात् below (+VI case)

प्रत्यहं everyday
तदर्थं for that purpose
द्रष्टुम् to see
गत्वा having gone
केवलं only
इह here
उद्दिश्य about / with regard to
न, न neither, nor
श्रोतुम् to listen
गन्तुम् to go
अधुना right now
वत् like
आगन्तुम् to come

(अभ्यासाः)

I. संवादः

गोपालः – भो मित्र ! कुत्र गच्छति भवान् ?

शिवः – गोपाल, रामकृष्णमठं प्रति गच्छामि ।

गो – किमर्थं मठं गच्छति ?

शि – तत्राहं संस्कृतं शिक्षे, अतः गच्छामि ।

गो – मठे संस्कृतपाठनं कथं भोः ?

शि – तत्र 'विवेकानन्दवाणीसंस्था' नाम कश्चन विद्यालयः वर्तते तस्मिन् विद्यालये संस्कृतं पाठ्यते ।

गो – किं तत्र केवलं संस्कृतं पाठ्यते ?

शि – न, तत्र न केवलं संस्कृतं पाठ्यते । किन्तु बह्व्यः अन्याः भाषाः अपि पाठ्यन्ते ।

गो – काः काः भाषाः तत्र पाठ्यन्ते ?

शि – भारतीयभाषासु संस्कृतं हिन्दी च पाठ्येते। फ्रेन्च, जर्मन्, जापनीस्, स्पानिश्, चैनीस्, आंग्लाद्याः विदेशीयाः भाषाः अपि पाठ्यन्ते।

गो – के वा एताः भाषाः पठितुं योग्याः ?

शि – योग्यताविषये तत्र न कोऽपि निर्बन्धो वर्तते, किन्तु दशमकक्षोत्तीर्णः सर्वः योग्यः।

गो – एकैकां भाषां पठितुं कति कक्ष्याः भवन्ति।

शि – तदर्थं सप्ताहे त्रिवारं तत्र गन्तव्यम्।

गो – संस्कृतकक्षा केषु दिवसेषु प्रवर्तते ?

शि – प्रायः सोम-बुध-शुक्रवासरेषु उत मंगल-गुरु-शनिवासरेषु प्रवर्तते। परन्तु इदानीं तु शनि- भानुवासरयोरपि संस्कृतविशेषकक्षा प्रवर्तमाना अस्ति।

गो – संस्कृतं कठिनमिति श्रूयते।

शि – आम्। या कापि नूतनभाषा कठिना एव। अभ्यासासक्तिभ्यामेव भाषा कण्ठगता भवति।

यदि अस्मदीयाः वैदेशिकभाषाः पठितुं प्रभवन्ति, तर्हि कथं संस्कृतभाषा या अस्माकं भारतीयभाषाणां जननी कठिना भवेत्। प्रत्युत अस्माकं बहुप्रादेशिकभाषासु प्रायः 70 / 80

प्रतिशतं शास्त्र-साहित्यसम्बद्धानि पदानि संस्कृतपदान्येव। अपि च सन्ति तत्र दैनिकव्यवहारे तत्सम-तद्भवरूपेण उत्पनाः बहवः शब्दाः।

गो – वाणीसंस्थातः पृथगन्यत् किं तत्र विद्यते ?

शि – वाणीसंस्थायाः भवनस्य अधस्तादेव एकः भव्यः ग्रन्थालयो अस्ति। तस्मिन् बहूनि नानाविषयकाणि

पुस्तकानि, बहुविधाः पत्रिकाश्च वर्तन्ते । एतं ग्रन्थालयं प्रति बहवः पाठकाः प्रतिदिनम् आगच्छन्ति ।

एषः ग्रन्थालयः प्रत्यहं प्रातः सायं च पाठकानां कृते मुक्तो भवति । तत्र न केवलं पुस्तकानि, किन्तु धार्मिकप्रवचनसंबद्धाः ध्वनिमुद्रिकाश्च विद्यन्ते । ये के ध्वनिमुद्रिकाः श्रोतुमिच्छन्ति ते ताः गृहं नीत्वा श्रुण्वन्ति ।

गो – अन्यत् किं तत्र दर्शनीयम् ?

शि – वाणीसंस्थायाः पार्श्वे सुविशालम् एकं दर्शनगृहं, पुरतः एका पुस्तकविक्रयशाला च वर्तेते ।

विक्रयशालायां बहवः ग्रन्थाः अन्यानि च बहूनि वस्तूनि विक्रीयन्ते । पुस्तकविक्रयशालापुरतः श्रीरामकृष्णस्य मन्दिरमस्ति । मठसन्निधौ एव सुन्दरमतिथिगृहमपि विद्यते । रामकृष्णमन्दिरस्य वामतः संन्यासिनाम् आवासो विद्यते । अस्य आवासस्य पृष्ठतः एकं सुमहद् भव्यं सभाभवनं निर्मितमस्ति । सभाभवनस्यास्य 'विवेकानन्द-मानवीय-उत्कृष्टताभवनम्' (Vivekananda Institute of Human Excellence) इति नाम । अत्र व्यक्तित्वविकासमुद्दिश्य नैकाः कार्यक्रमाः आयोज्यन्ते । नानाविधछात्रगणास्तत्र आगत्य शिक्षणं लभन्ते ।

गो – मित्र शिव, अहमपीदानीं तत्र गत्वा कामपि भाषां पठितुं समस्तं मठप्रदेशं च द्रष्टुम् इच्छाम्मि ।

शि – स्वागतं भवते । भवान् तु तत्र यदा इच्छति तदा गन्तुम् अर्हति ।

II. Traslate into Sanskrit :

1. Are you doing your home work regularly?
2. We are neither doing our home work nor reading any book.
3. All praise you, because you have intelligence.
4. No body praises us, everyone blames.
5. You are all wise men, therefore the teacher loves you.
6. I ask you who that man is?
7. We (both) are going to temple.
8. Without any fault, my teacher beats me at the school.
9. He asks us about the way to Mathura.
10. If you do not give me the book, I will beat you.
11. I do not want to go with you.
12. Do you (both) want to come with me to the bazar?
13. You (plural) have got lot of money, so you go to goreign countries.
14. We have no money, so we do not go out of country.
15. It is not my fault, therefore they help me.

III. Split the sandhis, recognize each word and translate :

1. येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
   ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥
2. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
   लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥

3. यस्य नास्ति विवेकस्तु केवलं यो बहुश्रुतः ।
न स जानाति शास्त्रार्थान् दर्वी पाकरसानिव ॥

4. त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ति ह्यर्थो हि लोके पुरुषस्य बन्धुः ॥

5. यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः ॥

6. शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम् ।
मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ॥

7. यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ।
किं जातमधुना येन यूयं यूयं वयं वयम् ॥

8. आशा नाम मनुष्याणां काचिदाश्चर्यशृंखला ।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत् ॥

9. गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति वसुदेवं न मानवाः ॥

10. दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते ॥

11. शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमिति अक्षरद्वयम् ॥

12. नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

13. वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोर्थवान्को दरिद्रः ॥

14. ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥

षोडशः पाठः(Lesson – 16)

(भूतकालः (लङ् - Past Tense)

Note : This lesson contains some selected stories which illustrate the conjugation of verbs in the simple past tense. All the verbs of the past tense are given in bold type.

शब्दसंग्रहः

(स्त्री)

अधिराजपरीक्षा Imperial examination

(पुं)

सारमेयः dog
स्यूतः bag
निर्देशः pointing out/mention
अनुग्रहः favour
दैवज्ञः a fortune-teller

(नपुं)

अवमर्दनम् – massage

अव्ययानि

हन्तुम् to kill
उड्डीय having flown
कदाचित् at some time
भक्षयितुम् to eat
खदितुम् to eat
दातुम् to give
खादित्वा having eaten
धृत्वा having held
मत्वा having thought
आनीय having brought
दत्त्वा having given
बुद्ध्वा having known
आरुह्य having climbed
पृथक् separately

प्राप्तुम् to get
उपगम्य having approached
त्यक्त्वा having given up
श्रुत्वा having heard
प्रोच्चार्य having uttered
सत्वरम् quickly
सद्य एव immediately
नक्तंदिवम् by night and day
उत्थाय having got up
पृष्ट्वा having asked
निश्चित्य having decided
विश्वास्य having made to believe
दृष्ट्वा having seen
तूष्णीम् silently
अवरुध्य obstructing

धातवः

वीज् (X.U)to fan (वीजयति/ते)
उद्दिश् (VI.P)to point out/ show(उद्दिशति)
अनुधाव् (I.P) to run after
तुष् (IV.P) to be pleased (causal-तोषयति)
प्रस्था (I.A) to start (प्रतिष्ठते)
निर्गम् (I.P) to go away/ disappear
उपविश् (VI.P) to sit (उपविशति)
शप् (I.U) to curse (शपति)
निविद् (II.P)to inform (causal-निवेदयति)
चिन्त् (X.U) to think, consider (चिन्तयति)
समागम् (I.P) to approach/ return (समागच्छति)

विशेषणानि

छिन्न cut
एतादृश like this
विवश helpless
चतुर clever
यथार्थ true
जीवित living
समाप्त fiished
गत gone

परिवृत surrounded	संजात born / grown
हरणीय to be stolen	समायात came
रक्षणीय to be protected	सुप्त – asleep
निहितम् hidden / kept	निवेदित told

1. <u>मूर्खमित्रम्</u> ।

एकस्मिन् नगरे एकः नृपः **आसीत्** । तस्य भवने बहवः पशवो **न्यवसन्** । ते तस्य सेवाम् **अकुर्वन्** ।

तेषु पशुष्वेको वानरः तस्य प्रियः **अभवत्** । एकदा नृपः सुप्तः **आसीत्** । तदा स वानरः व्यजनेन तम् **अवीजयत्** । तस्मिन् समये एका मक्षिका नृपस्य नासिकायाम् **उपाविशत्** । वानरः वारं वारं तां मक्षिकां व्यजनेन निवारयति स्म। तथापि सा मक्षिका पुनःपुनः आगत्य तत्रैव **अतिष्ठत्** । तेन स वानरः क्रुद्धः **अभवत्** । तां मक्षिकां हन्तुं सः खड्गेन प्रहारम् **अकरोत्** । मक्षिका तु उड्डीय दूरम् **अगच्छत्** किन्तु

प्रहारेण नृपस्य नासिका छिन्ना **अभवत्** । *अतः <u>'मूर्खजनैः सह मित्रता' नोचिता'</u>* /

2. <u>न स्वभावः परिवर्तते</u> ।

तपोधनो नाम कश्चित् ऋषिः **आसीत्** । स एकदा काकस्य मुखात् पतितं मूषकम् **अपश्यत्** ।

दयालुः सः तमाश्रमम् **अनयत्** । अथ एकदा कश्चन बिडालो मूषिकं हन्तुम् **अधावत्** । ततः सः तापसः स्वस्य तपसः प्रभावेण तं मूषकं बिडालं कर्तुम् **ऐच्छत्** **अवदत्** च – 'हे मूषक ! त्वं बिडालो भव' इति ।

तत्क्षणं स मूषको बिडालः **अवत्** । अथ कदाचित् एकः सारमेयः तं बिडालं भक्षयितुम् **अन्वधावत्** । पुनर्मुनिः **अवदत्** , 'हे बिडाल ! त्वमपि शुनको भव' इति । सद्य एव बिडालः शुनको**ऽभवत्**।

अथ कदाचित् एकः व्याघ्रस्तमेव *मूषक-बिडाल-शुनकं* खादितुम् **अन्वधावत्** । पुनरेकवारं मुनिः शुनकम् **अवदत्** – 'हे शुनक ! त्वं व्याघ्रो भव' इति । तत्क्षणं सः शुनको व्याघ्रो**ऽभवत्** । एवं सः मूषकः क्रमेण व्याघ्रः जातः ।

अथ स व्याघ्रः तमेव ऋषिं भक्षयितुम् **ऐच्छत्** । तदा क्रुद्धः ऋषिः व्याघ्रं एवम् **अशपत्** – 'त्वं पुनः मूषको भव' इति ।

3. अंगुलिक्रीडा

त्रयः पुरुषा अधिराजपरिक्षालेखनार्थम् एकं दैवज्ञं संमन्त्रयन्ते स्म । दैवज्ञः तेषां प्रश्नानां प्रत्युत्तरस्थाने अंगुलिम् एकम् **अदर्शयत्** ।

घोषिते अधिराजपरीक्षापरिणामे तेषु त्रिषु एक उत्तीर्णः **अभवत्** । तेन तस्य दैवज्ञस्य कीर्तिः सर्वत्र **प्रासरच्च** ।

एकदा कश्चन छात्रः तस्य दैवज्ञस्य विजयरहस्यं किमिति तम् **अपृच्छत्** । 'न किमपि भाषणं मम रहस्यमिति' **अवदत्** दैवज्ञः । छात्रः एतेन उत्तरेण संभ्रान्तः *संजातः* । (participle verb)

तदा दैवज्ञः वक्तुम् **आरभत** । "यूय माम् अंगुलिम् उद्धरन्तं **अपश्यत** । तन्नाम त्रिषु एक एव सफलीभविष्यतीति । तथानुष्ठिते (that being accomplished) मम भाविकथनं सत्यम् **आसीत्** ।

यदि द्वौ उत्तीर्णौ **आस्तां** तथापि मम एकांगुलिनिर्देशः सत्यम् *अभविष्यत्* (would have become) ।

यतः एका अंगुली नाम एक एव विफलीभविष्यति । यदि सर्वे त्रयः उत्तीर्णाः अभविष्यन् तर्हि सर्वे मिलित्वा

परीक्षायां सफलीभविष्यन्तीति अंगुली उद्दिशति । एवं विपरीतमपि यथार्थाय" । [Chinese story translated]

4. चतुरो वानरः

एकस्मिन् नदीतटे एकः जम्बूवृक्षः **आसीत्** । तस्मिन् वृक्षे एकः वानरः निवसति स्म । स नित्यं जम्बूफलानि खादति स्म । कश्चन मकरः तस्यां नद्याम् **अवसत्** । वानरः प्रतिदिनं तस्मै जम्बूफलानि **अयच्छत्** । एकदा मकरः स्वपत्न्यै अपि दातुं मधुराणि कानिचन फलानि **अनयत्** । तानि फलानि खादित्वा तस्य मकरस्य भार्या **अचिन्तयत्** – 'अहो यः प्रतिदिनम् एतादृशानि मधुराणि फलानि खादति, नूनं तस्य हृदयमपि अतिमधुरं भवति' इति । सा पतिम् **अकथयत्** – 'यदि मां जीवितां द्रष्टुमिच्छसि, तर्हि आनय शीघ्रं तस्य वानरस्य हृदयम्' इति ।

विवशः मकरः नदीतीरं गत्वा वानरम् **अवदत्** – 'बन्धो ! तव भ्रातृपत्नी त्वां द्रष्टुमिच्छति । अतः मम गृहमागच्छ' । वानरः **अपृच्छत्** – 'क्व ते गृहम्' । मकरः **अकथयत्** – 'नदीमध्ये' । वनरः **प्रत्यवदत्** – 'कथमहं तत्र गच्छामि' । मकरः **अवदत्** – 'अलं चिन्तया', अहं त्वां स्वपृष्ठे धृत्वा मम गृहं नयामि' इति।

तस्य वचनं सत्यं मत्वा वानरः तथा **अकरोत्** । नदीजले वानरं विवशं मत्वा मकरः **अकथयत्** – 'वस्तुतः मम पत्नी तव हृदयं खादितुमिच्छति' । चतुरः वानरः झटिति **अवदत्** – 'मम हृदयं तु वृक्षस्य कोटरे निहितमस्ति । कथं न त्वया पूर्वं निवेदितम् । अतः शीघ्रं तत्रैव गच्छावः येन अहं स्वहृदयमानीय भ्रातृभार्यायै दत्त्वा तां तोषयामि' इति । मूर्खः मकरः तस्याभिप्रायं न बुद्ध्वा वानरं पुनः तं वृक्षं प्रति शीघ्रम्

अनयत् । वृक्षमारुह्य वानरः मकरमेवम् **अपावदत्** – 'धिक् मूर्ख ! किं हृदयं शरीरात् पृथक् तिष्ठति ? । गच्छ, अतःपरम् आवयोः मैत्री समाप्ता' ।

5. तपसा किं न सिध्यति ?

पार्वती पतिरूपेण शिवं प्राप्तुं तपस्याम् आचरति स्म । ग्रीष्मकाले सा दिवा अग्निभिः परिवृता सूर्यं **पश्यति स्म** । हेमन्तर्तौ रात्रिषु शीतलजले आकण्ठं निमग्ना **अतिष्ठत्** । एवं केचित् मासाः *गताः* । एकदा कश्चित् वटुः तपोवनं **प्राविशत्** । वटोः आननं देदीप्यमानम् **आसीत्** । वटुं दृष्ट्वा पार्वती आसनात् उत्थाय तमुपगम्य सादरम् **अकथयत्** – 'भोः तापस, स्वागतं भवते । उपविशतु, श्रमं च अपनयतु भवान्' ।

वटुः कुशलं पृष्ट्वा कौतूहलेन **अवदत्** – 'हे तपस्विनि, किमर्थं कठिनां तपस्यां करोषि'। सा तूष्णीम् **अतिष्ठत्** । तदा पार्वत्याः सखी तस्याः तपसः प्रयोजनं तस्मै वटवे **न्यवेदयत्** ।

तत् श्रुत्वा वटुः उमाम् **अपृच्छत्** – 'अयि पार्वति, किं सत्यमेतत् ? । अपि त्वं शिवं पतिमिच्छसि'?।

पार्वती **अवदत्** – 'आम् ,मम एष निश्चयः'। वटुः –'मैवं मैवम् । नोचितं खल्वेतत् । शिवस्य त्रीणि नेत्राणि, श्मशाने वासः, भस्मलिप्तं शरीरं, वृषभो वाहनम् । किमेतादृशं पतिं वांछसि, कस्योपदेशेन एवं करोषि' इति । पार्वती शिवनिन्दां श्रुत्वा क्रोधेन एवम् **अवदत्** – 'अपसर अरे वाचाल, नोचितं त्वया सह संभाषणम् । महेश्वरस्य अलौकिकं स्वरूपं त्वं न अवगच्छसि । अथवा अहमेवेतः गच्छामि' इति ।

यदा सा *चलिता*, शिवः वटोः रूपं त्यक्त्वा तस्याः मार्गम् अवरुध्य **अवदत्** – 'पार्वति, प्रीतोऽस्मि तव तपसा' इति

6. आषढभूतिः

अस्ति कस्मिंश्चित् विविक्तप्रदेशे मठायतनम् । तत्र देवशर्मा नाम परिव्राजकः *निवसति स्म* । तस्य अनेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात् कालेन महत् धनं *संजातम्* । ततः स न कस्मिंश्चित् *विश्वसिति स्म* ।

सर्वमपि धनं स्यूते निक्षिप्य नक्तंदिवं तं धनस्यूतं न **अत्यजत्** । अथ आषढभूतिर्नाम परवित्तापहारकः धूर्तः तद्धनं दृष्ट्वा **अचिन्तयत्** –'कथं मया एतस्य धनं हरणीयम्' इति । 'तदत्र मठे दृढशिलासमूहवशात् भित्तिभेदो न भवति, उन्नतत्वात् द्वारेण प्रवेशोऽपि न भवति । तदेनं मायावचनैः विश्वास्य अहमेतस्य छात्रो भवामि' । एवं निश्चित्य तस्य समीपं गत्वा – 'ॐ नमः शिवाय' इति प्रोच्चार्य

साष्टाङ्गं प्रणम्य च सविनयम् **अवदत्** – 'भगवन् , असारः संसारोऽयम् । गिरिनदीवेगोपमं यौवनं, तृणाग्निसमं जीवितं, शरदभ्रच्छायासदृशाः भोगाः, स्वप्नसदृशो मित्रपुत्रकलत्रभृत्यवर्गसंबन्धः, एवमहं सम्यक् अवगच्छामि । तत् केन प्रकारेण मम संसारसमुद्रोत्तरणं भविष्यति' ? । तत् श्रुत्वा देवशर्मा **अवदत्** – 'वत्स, धन्योऽस्मि यत् यौवने एवं विरक्तिभावः । अनुग्रहं ते करोमि । किन्तु रात्रौ त्वया मठमध्ये न प्रवेष्टव्यम्' । आषाढभूतिः **अवदत्** – 'भगवन् भवदादेशः प्रमाणम्' । तदा देवशर्मा अनुग्रहं कृत्वा शास्त्रोक्तविधिना तं शिष्यम् **अकरोत्** । सोऽपि हस्तपादावमर्दनादिसेवया तम् **अतोषयत्** । तथापि देवशर्मा धनस्यूतं न **अमुंचत्** । अथैकदा आषाढभूतिः **अचिन्तयत्** – 'अहो न कथंचित् एषः मे विश्वासम् आगच्छति । तत्किं दिवापि शस्त्रेण मारयामि, किं वा विषं प्रयच्छामि, किं वा पशुधर्मेण मारयामि' इति । तदा कश्चन देवशर्मशिष्यपुत्रः ग्रामात् आमन्त्रणार्थम् **आगच्छत् अवदत्** च – 'भगवन् यज्ञोपवीतदानसंस्कारार्थं मम गृहमाच्छत्विति' । तत् श्रुत्वा देवशर्मा आषाढभूतिना सह सन्तोषेण **प्रातिष्ठत** ।

अथ मार्गे काचित् नदी *समायाता* तां दृष्ट्वा धनस्यूतं सुगुप्तं कृत्वा स्नात्वा देवार्चनं कृत्वा, तदनन्तरम् आषाढभूतिमेवम् **अवदत्** – 'भो आषाढभूते, यावद् अहं पुरीषोत्सर्गं कृत्वा समागच्छामि तावद्

एषः स्यूतः योगेश्वरस्य सावधानतया रक्षणीयः' इति उक्त्वा **अगच्छत्** । आषाढभूतिरपि तं दूरं गतं दृष्ट्वा

धनस्यूतं स्वीकृत्य सत्वरं **निरगच्छत्** ।

*****

APPENDIX – I

pāṇini sūtrās in support of the Rules given in this book.

Lesson	Rule	sūtrās
2	1	वर्तमाने लट् ।
4	1	तिङ्स्त्रीणि त्रीणि प्रथममध्यमोत्तमाः । (I-4-101)
	1	तान्येकवचनद्विवचनबहुवचनान्येकशः । (1-4-102)
	2	i) अस्मद्युत्तमः । (1-4-108)
		ii) युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (1-4-105)
		iii) शेषे प्रथमः (1-4-108)
	3	मोऽनुस्वारः । (8-3-23)
5	7	प्रातिपदिकार्थलिङ्गपरिमाणमात्रे प्रथमा । (2-3-46)
	8	कर्मणि द्वितीया । (2-3-2)
	9	a) कर्तृकरणयोस्तृतीया । (2-3-18)
		b) सहयुक्तेऽप्रधाने । (2-3-19)
		c) हेतौ । (2-3-23)
	11	रषाभ्यां नो णः समानपदे । (8-4-1)
		अट्कुप्वाङ्नुम्व्यवाये अपि । (8-4-2)
		पदान्तस्य न । (8-4-37)
6	3	यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् । (1-4-13)
	4	अतो दीर्घो यञि । (7-3-101)
	5	अतो गुणे । (6-1-97)
	7	चतुर्थी संप्रदाने । (2-3-13)
	8	अपादाने पञ्चमी । (2-3-28)
7	2	कर्तरि शप् । (3-1-68)
	3	तुदादिभ्यः शः । (3-1-77)

	4	षष्ठी शेषे । (2-3-50)
	6	सप्तम्यधिकरणे च । (2-3-36)
	7	संबोधने च । (2-3-47)
	8	उपसर्गाः क्रियायोगे । (1-4-49)
8	1	दिवादिभ्यः श्यन् । (3-1-68)
	2	सत्यापि- (इत्यादि) चुरादिभ्यो णिच् । (3-1-25)
	II	पृथग्विनानानाभिस्तृतीयान्यतरस्याम् । (2-3-32)
	III	नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च । (2-3-16)
	III.6	क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । (1-4-37)
	III.7.	स्पृहेरीप्सितः । (1-4-36)
	VI.2.	यतश्च निर्धारणम् । (2-3-41)
9	4	अकः सवर्णे दीर्घः । (6-1-101)
	5	आद्गुणः । (6-1-87)
	6	वृद्धिरेचि । (6-1-88)
	7	एङः पदान्तादति । (6-1-109)
	8	नादिचि । (6-1-104) ; हशि च । (6-1-114) ;
		विसर्जनीयस्य सः (8-3-34)
		स्तोः श्चुनाश्चुः । (8-4-40) ; ष्टुना ष्टुः । (8-4-41);
		भोभगो अघो अपूर्वस्य योऽशि । (8-3-17) ;
		लोपःशाकल्यस्य । (8-3-17)
		ससजुषो रुः । (8-2-66)
10	1	लट् स्मे । (3-2-118)
11	1	पतिः समास एव । (1-4-8)
	2	राजाहस्सखिभ्यः टच् । (5-4-91)
13	3	a. एचोऽयवायावः । (6-1-78)
		b. लोपःशाकल्यस्य । (8-3-19)
		c. पूर्वत्रासिद्धम् । (8-2-1)

14	1	सर्वादीनि सर्वनामानि । (1-1-27)
	5	a. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । (6-1-132)
		b. सोचि लोपे चेत्पादपूरणम् । (6-1-134)
15	1	न चवाहाहैवयुक्ते । (8-1-24)
	2	इको यणचि । (6-1-77)

Appendix-II
(सुभाषितरत्नानि)

1) केयूरा न विभूषयन्ति पुरुषं, हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं, नालंकृता मूर्धजाः ।
वाण्येका समलंकरोति पुरुषं, या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं, वाग्भूषणं भूषणम् ॥

2) विद्या नाम नरस्य रूपमधिकं, प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी, विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने, विद्या परा देवता
विद्या राजसु पूजिता न तु धनं, विद्याविहीनःपशुः ॥

3) पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

4) प्रारभ्यते न विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥

5) जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

6) काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलन्ति ॥

7) अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे स न जीवति ॥

8) सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनं ।
सुखाच्च यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ॥

9) माता निन्दति नाभिनन्दति पिता, भ्राता न संभाषते
भृत्यः कुप्यति नानुगच्छति सुतः, कान्ता च नालिङ्गते ।
अर्थप्रार्थनशंकया न कुरुते, संभाषणं वै सुहृ-
त्तस्माद्रव्यमुपार्जयस्व सुमते, द्रव्येण सर्वे वशाः ॥

10) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥

11) गावो गन्धेन पश्यन्ति वेदैः पश्यन्ति पण्डिताः ।
चारैः पश्यन्ति राजानः चक्षुर्भ्यामितरे जनाः ॥

12) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

13) संसारकटुवृक्षस्य द्वे फले ह्यमृतोपमे ।
सुभाषितरसास्वादः संगतिः सुजने जने ॥

14) उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काकः कनकसूत्रेण कृष्णसर्पमघातयत् ॥

15) अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।

अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ॥

16) आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥

17) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥

18) न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ॥

19) मात्रासमं नास्ति शरीरपोषणं चिन्तासमं नास्ति शरीरशोषणम् ।
भार्यासमं नास्ति शरीरतोषणं विद्यासमं नास्ति शरीरभूषणम् ॥

20) किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरम् ।
यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम् ॥

21) नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपस्या खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥

22) यौवनं धनसंपत्तिः प्रभुत्वमविवेकता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

23) मूर्खोऽपि शोभते तावत्सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत्किंचिन्न भाषते ॥

24) वैद्यराज ! नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च ॥

25) अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ।
करोति सफलं जन्तोः कर्म यच्च करोति सः ॥

26) बन्धुरिव भवति पूर्वं मध्ये मित्रमिव शत्रुरिव चान्ते ।
कृकलास इव दुरात्मा त्रीन् वर्णान् दर्शयति ॥

27) परवादे दशवदनः पररन्ध्रनिरीक्षणे सहस्राक्षः ।
सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनो नीचः ॥

28) द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ॥

29) उपकाराच्च लोकानां निमित्तान्मृगपक्षिणां ।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात्सताम् ॥

30) दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥

31) हे दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
लोकान्पश्याम्यहं सर्वान् न मां पश्यति कश्चन ॥

32) गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थी नोपलभ्यते ॥

33) अन्नदानं परं दानं विद्यादानमतः परम् ।
अन्नेन क्षणिका तृप्तिर्यावज्जीवं च विद्यया ॥

34) रजनिकरः किल शीतो रजनिकराच्चन्दनो महाशीतः ।
रजनिकरचन्दनाभ्यां सज्जनवचनानि शीतानि ॥

35) दिवसकरः किल तीक्ष्णो दिवसकरात्पावको महातीक्ष्णः ।
दिवसकरपावकाभ्यां दुर्जनवचनानि तीक्ष्णानि ॥

36) अर्थातुराणां न गुरुर्न बन्धुः कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न रुचिर्न वेला ॥

37) नाहं वसामि वैकुण्ठे योगिनां हृदये न च ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥

38) दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥

39) यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ॥

40) अहस्तानि सहस्तानां अपदानि चतुष्पदाम् ।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥

प्रहेलिकाः

41) अस्थि नास्ति शिरो नास्ति बाहुरस्ति नरङ्गुलिः ।
नास्ति पादद्वयं गाढमङ्गमालिंगति स्वयम् ॥

42) एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः ॥

43) कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी ।
पंचभर्त्री न पांचाली यो जानाति स पण्डितः ॥

44) नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता ।
अमुखी कुरुते शब्दं जातमात्रा विनश्यति ॥

45) न तस्यादिर्नतस्यान्तः मध्ये यस्तस्य तिष्ठति ।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद ॥

46) देवराजो मया दृष्टो वारिवारणमस्तके ।
भक्षयित्वार्कपत्राणि विषं पीत्वा क्षयं गतः ॥

47) चतुर्थजः पंचमगः दृष्ट्वा प्रथमसंभवाम् ।
तृतीयं तत्र निक्षिप्य द्वितीयमतरत्पुनः ॥

48) वने वसति को वीरः योऽस्थिमांसविवर्जितः ।
असिवत् कुरुते कार्यं कार्यं कृत्वा वनं गतः ॥

APPENDIX-III

बन्धुवर्गः (words of relation)

Aunt (father's sister) - पितृव्या

Brother – भ्राता (तृ)

Brother's daughter (niece) - भ्रातृव्या / भ्रातृसुता

Brother's son (nephew) - भ्रातृव्यः

Brother's wife (sister-in-law) - भ्रातृजाया

Daughter - पुत्री / सुता / तनया / आत्मजा

Daughter's daughter (granddaughter) - दौहित्री
Daughter's son (grandson) - दौहित्रः
Daughter-in-law - स्नुषा / पुत्रवधूः
Elder brother – अग्रजः
Elder brother of the husband – भ्रातृश्वशुरः
Elder sister - अग्रजा
Eldest brother -- ज्येष्ठः
Eldest sister - ज्येष्ठा
Father - पिता / जनकः
Father's sister - पितृष्वसा
Father-in-law (wife's or husband's father) -- श्वशुरः
Friend – मित्रम् (नपुं) / वयस्यः (पुं) / सखा (पुं) (सखिन्) / सुहृद्
Grandfather - (paternal) - पितामहः
Grandfather (maternal) - मातामहः
Grandmother - (paternal) पितामही
Grandmother (maternal) - मातामही
Great granddaughter - प्रपौत्री
Great grandfather (paternal) - प्रपितामहः
Great grandson - प्रपौत्रः
Husband's brother - देवरः / देवा (वृ)
Husband's brother's wife - याता (तृ)
Husband's sister - ननान्दा (दृ)
Mother - माता / जननी
Mother-in-law – श्वश्रूः (wife's or husband's mother)
Sister - भगिनी / स्वसा (सृ)
Sister's daughter – भागिनेयी / स्वस्रेया
Sister's husband (brother-in-law) - आवुत्तः

Sister’s son – भागिनेयः
Sisterhood – भगिनीत्वम्
Son- पुत्रः / सूनुः / तनयः / आत्मजः
Son’s daughter (granddaughter) - पौत्री
Son’s son (grandson) - पौत्रः
Son-in-law – जामाता (तृ)
Uncle (father’s brother) - पितृव्यः
Widow – विधवा
Widower – विधुरः
Wife – भार्या / जाया / पत्नी (स्त्री) / दाराः (पुं)
Wife of an elder brother / brother’s wife - प्रजावती
Wife’s brother (brother-in-law) - श्यालकः / श्यालः
Wife’s sister (sister-in-law) - श्यालिका / श्यालकी / श्याली
Younger brother - अनुजः
Younger sister - अनुजा

APPENDIX- III.A
वर्णवर्गः (Words of colours)

Black – कृष्णः
Brown – कपिलः
Dark-blue & red – नीललोहितः
Green – हरितः
Grey – धूसरः
Parrot green – शुकहरितः
Pink – पाटलः
Red - रक्तः

Saffron – केसरः

White – श्वेतः

Yellow – पीतः

APPENDIX-III.B

गृहवस्तुवर्गः(Home-related Words)

Almirah – वस्तुदानी (स्त्री)

Bag – स्यूतः (पुं)

Basket – कण्डोलः (पुं)

Bathroom – स्नानप्रकोष्ठः (पुं)

Bed – शय्या (स्त्री)

Bed sheet – तल्पः (पुं)

Bedroom – शयनप्रकोष्ठः (पुं)

Blanket – आच्छादकम् (नपुं)

Bottle – कूपी (स्त्री)

Box – पेटिका (स्त्री)

Broomstick – संमार्जनी (स्त्री)

Bucket – द्रोणी (स्त्री)

Candle – सिक्थवर्तिका (स्त्री)

Cap – पिधानम् (नपुं)

Chair – आसनम् (नपुं) / आसन्दः (पुं)

Comb – कंकतम् (नपुं)

Cot – पर्यङ्कः (पुं)

Curtain – यवनिका (स्त्री)

Dining Room – भोजनशाला (स्त्री)

Entrance – मुखद्वारम् (नपुं)

Fan – व्यजनम् (नपुं)

Floor – भूमिः / अट्टः / अट्टम् / (पंचभूमिकः = 5 floored) ; (द्वितीयकोष्ठं = 2nd floor)

Flowerpot – पुष्पाधानी (स्त्री)

Iron box – समीकरः (पुं)

Key – कुंचिका (स्त्री)

Kitchen – पाकशाला (स्त्री) / महानसम् (नपुं)

Lock – तालः (पुं)

Mat – कटः (पुं)

Needle – सूची (स्त्री)

Pillow – उपधानम् (नपुं)

Rope – रज्जुः (स्त्री)

Scissors – कर्तरी (स्त्री)

Shallow cup / dish / plate – शरावः (पुं)

Soap – फेनकम् (नपुं)

Spoon – चमसः (पुं)

Table – उत्पीठिका (स्त्री)

Tap – नालः (पुं)

Umbrella – छत्रम् (नपुं)

Wick – वर्तिः (स्त्री)

APPENDIX-III.C

शरीरावयववर्गः(Body-related words)

Ankle – गुल्फः

Arm – बाहुः / बुजः (पुं)

Back – पृष्ठम् (नपुं)

Belly – उदरम् (नपुं)

Bone – अस्थि (नपुं)

Cheek – कपोलः (पुं)

Chest – वक्षःस्थलम् / वक्षस् (नपुं)

Chin – चिबुकम् (नपुं)

Elbow – कूर्परः

Eye – नयनं / तेत्रम् (नपुं)

Eye-brow – भ्रूः (स्त्री)

Eyelash – पक्ष्मन् (नपुं)

Face – मुखम् (नपुं)

Finger – अंगुलि / अंगुली (स्त्री)

Fist – मुष्टिः (पुं & स्त्री)

Foot – पादः (पुं)

Forehead – ललाटम् (नपुं)

Gum – दन्तपाली (स्त्री)

Hair – केशः (पुं)

Hand – हस्तः (पुं)

Head – शिरस् (नपुं)

Knee – जानु (नपुं)

Lip – ओष्ठः -- Lower lip – अधरः (पुं)

Moustache / beard – श्मश्रु (नपुं)

Mouth – मुखम् / आननम् / वदनम् (नपुं)

Nail – नखः (पुं)

Naval – नाभिः (स्त्री)

Neck – कण्ठः (पुं)

Nose – नासिका (स्त्री)

Palm – करतलम् (नपुं)

Pupil – कनीनिका (स्त्री)

Tears – अश्रु (नपुं)
Thigh – ऊरुः (पुं)
Tooth – दन्तः
Waist – कटिः / कटी (स्त्री) / कटिदेशः (पुं)
Wrist – मणिबन्धः (पुं)

APPENDIX-III.D
वेषभूषवर्गः (words of Attire & Decoration)

